Patanjali
Mahabhasyam



BIBLIOTHECA INDICA:

A


COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 978.

PK
531
A15
1899
V. 1
PT. 8



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇĀSTRĪ.

VOL. I, FASCICULUS VIII.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

MAR 19 1969

OF BOOKS FOR SALE

AT THE LIBRARY OF THE

SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Śāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–2		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Catalogue of Sanskrit Books and MSS., Fasc. 1–2 @ 2/ each ...		4	0
Çatapatha Brāhmaṇa, Fasc. 1–2		0	12
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1		0	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–14 @ /6/ each ...		4	2
Ditto Lāṭyāyāna, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadādhara Paddhati Kālasāra Vol I. Fasc. 1		0	6
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–8 @ /6/ each		3	0
Manuṭīkā Saṃgraha, (Text) Fasc. 1–4 @ /6/ each		1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4

ग्निदिति तत्पुरुषः । दूत्संज्ञकग्रकारादिप्रत्ययभिन्नप्रत्यय दूत्यर्थः । अन्तरङ्गत्वात्त्विवादिषु एग्नि च कृते आत्वमिति भावः ॥ दिवेः सनि [१]"सनीवन्ते"तीडभावपक्षे [२]"हलन्ताच्च" इति कित्त्वे [३]"च्छ्वोरि" त्यूठि यणिच [४]"सन्यङोः" इति द्वित्वरूपम् ॥ द्वितीयं निराकरोति भाष्ये

[५]प्रत्यय इति ॥ (भा)

चपुसमिति । (कै)

ढपसमिति पाठान्तरं ढपुसमिति च ॥ कर्मधारयमुपपादयति

[६]विशिष्टावस्थेति । (कै)

रूपरसगन्धान्तरयुक्तमित्यर्थः । आद्ये चपुसं फलविशेषः । द्वितीये समासाभावेऽपि न चतिरितिवोध्यम् ॥

तद्रूपाऽऽरोपेणेति । (कै)

दृष्टान्तबलेन तथैव लाभात् ॥ ननु दृष्टान्ते लक्षणाया अव्यभिचारेण कार्य्यजननप्रतीतिः प्रयोजनं प्रकृते च न किं चित्तथेतिलक्षणा दुरुपपादेत्यत आह

अथवेति ॥ (कै)

कालेति । (कै)

---

१ अ ७ । पा २ । सू ४९ ॥ २ अ १ । पा २ । सू १० ॥
३ अ ६ । पा ४ । सू १९ ॥ ४ अ ६ । पा १ । सू ९ ॥
५ प्रत्यय इति चेदिति । ग । क ॥
६ अत्र "दध्येव" इति प्रतीकः क ग चिह्नितपुस्तकेऽस्ति ॥

द्विर्वचनविधानसमय एवेत्यवधारणाभाव इत्यर्थः। एवं चक्रतुरित्याद्यसिद्धिः पुनर्यणादेशानापत्तेरिति भावः। प्रत्ययश्च विशेष्यते द्विर्वचनं चेत्यस्य चिकीर्षितत्वेन निर्दिश्यत इति शेषः॥ तच्चाश्रुतस्य प्रत्ययस्य कथं विशेष्यत्वमत आह

द्विर्वचनेनेति। (कै)

अचीत्युपादानात् षाष्ठमिह द्विर्वचनं तच्च प्रत्यये इति तेन तदाचकप्रत्ययपदाक्षेप इत्यर्थः। तद्भावभावितामात्रेण निमित्तताया आश्रयणात्सन् यङन्तस्य द्विर्वेऽपि तदाक्षेपः। स चाचीत्यस्य श्रवणात् सन्नन्तस्यैवेति भावः॥

अचीत्येतच्च तस्येति। (कै)

विशेषणमित्याक्ष्यते। तदादिविधिरित्यस्य तेनेत्यादिः। तदयमर्थः। द्विर्वनिमित्ताजादिप्रत्ययनिमित्तोऽजादेशः स्थानिवद् द्विर्वे कर्त्तव्ये इति॥

विरुद्धत्वादिति। (कै)

एवं च सहविवक्षाभावान्नैकशेषो वक्तुं शक्य इति भावः॥

[1]प्रागेव। (कै)

सर्वादीनीत्यत्र॥ नन्वेकशेषे द्विर्वचनाऽप्राप्तिरत आह

विभक्त्यन्तयोरिति। (कै)

---

१ सहविवक्षाभावेऽपि "सरूपाणाम्" (१। २। ६४) इत्येकशेषः संज्ञापरिभाषावल्लक्षणाङ्गत्वात्तस्येति प्रागेवोक्तम्। विभक्त्यन्तयोरेकशेषविधानादप्रातिपदिकत्वाच्च द्विर्वचनाभावः॥

परिभाषावच्छास्त्रमात्रोपयोगित्वादिति भावः॥ प्रातिपदिकानामेवैकशेषेऽप्याह

[1]अथवेति। (कै)

नीलोत्पलस्पर्धिनी नेत्रे तनुर्वेतिवदिति भावः। क्रमेण बोधादत्रावृत्तिर्वोद्धारं प्रति उच्चारयितुस्तन्त्रम्। इह निमित्तशब्देन साक्षात्परम्परासाधारणं प्रयोजकं न तु साक्षादेवेत्याग्रहः। तद्भाव भावितामात्रेण [2]निमित्तस्येहाङ्गीकारात्। अत एव चक्रतुरित्युदाहरणसंगतिः॥ स्वोक्तसर्वेष्वित्यस्य [3]"पुयण्ज्यिषु" इति भाष्ये निर्धारणषष्ठमौनिर्देशस्य च कृत्यमाह

पिपविषत इति॥ (कै)

अनेन। (कै)

"द्विर्वचनेऽचि" इत्यनेन॥ नचात्रोत्तरखण्डे जातयोरचोः [4]"अचः परस्मिन्" इति स्थानिवत्त्वेनावर्णपरत्वाभावात् कथं [5]"ओः पुयण्" इत्यस्य प्राप्तिरिति वाच्यम्। एतत्सूत्रारम्भसामर्थ्यादेव तदप्रवृत्तेः। [6]"सनीवन्त" इति [7]"स्त्रिपूङ्" इति चोभयचेट्॥

---

१ अथवैकशेषेण समानफलत्वात्तत्त्वमात्रवृत्तिर्वा लक्ष्यते॥

२ निमित्तस्य। क। ग॥

३ ओः पुयण्ज्यिषु (७। ४। ८०) वचनं ज्ञापकं णौ स्थानिवद्भावस्य॥

४ अ १। पा १। सू ५७॥ ५ अ ७। पा ४। सू ८०॥

६ अ ७। पा २। सू ४९॥ ७ अ ७। पा २। सू ७४॥

(द्विर्वचनेऽचि। १। १। ५९।) (अ. १। पा. १। आ. ८)

नन्ववर्णपरपुयण्जयो णौ प्रत्ययान्तरे च संभवन्ति तत्कथं णावित्युक्तमित्याशङ्कते

नन्विति॥ (कै)

[1]येन नेति। (कै)

प्रकृतसूत्रे "परस्मिन्" इति वर्त्तते तेन द्वित्वनिमित्तेऽजादौ प्रत्यये प्रत्ययान्तरेणाव्यवहिते परे सति योऽजादेशः स स्थानिवदिति सूत्रार्थः। तत्राऽनेन ज्ञापकेन व्यवाये प्रवृत्तिर्ज्ञाप्यते तत्र प्रत्ययव्यवधानं विना वर्गादीनामुदाहरणासंभवेन येन नाव्यवधानन्यायेनैकव्यवधाने एव प्रवृत्तिः स च णेरेव संभवतीति भावः। न च उरुच्चजुअस्वग्भ्यादिभ्य आचारक्विपि सनि दृटि द्वित्वे गुणाद्यभावे उरुरविषतीत्यादावित्त्वार्थं वर्गादिग्रहणं चरितार्थम्। किं च भ्वादिभ्यो विजन्तेभ्य आचारे क्विपि सनि विभविषतीत्यादौ चरितार्थमिति कथं ज्ञापकत्वमिति वाच्यम्। [2]"सनिग्रह" इत्यत्रोपदेशाधिकाराभावस्य [3]"एकाच उपदेशे" इति सूत्रे भाष्ये ध्वनितत्वेनोक्तप्रयोगेषु तेन निषेधेनेटो दुर्लभत्वादेषामनभिधानाच्च विचोऽसार्वत्रिकत्वाच्च। एतेन द्वादिभ्य आचारक्विपि सनि दिद्विषतीत्यादावेकव्यवधानस्यैव सत्त्वेन दोष इत्यपास्तम्॥ भाष्ये

---

१ येननाव्यवधानमित्येकेनैव प्रत्ययेन तच्च व्यवधानाश्रयणात्सेरेव केवलस्य व्यवधायकस्य संभवात्॥

२ अ ७। पा २। सू १२॥ ३ अ ७। पा २। सू १०॥

[1]णौ स्थानिवदिति। (भा)

अत्र णाविति प्रत्ययग्रहणेन यस्मादिहितस्तदादेरित्यस्योपस्थित्या तस्याचो णिनिमित्तकादेश इत्यर्थः। यदि त्वनियमप्रसक्त्यभावेन नियमफलायास्तस्या नोपस्थितिरत एव [2]"ह्रस्वस्य पिति" इत्यादौ न तदुपस्थितिरित्युच्यते तर्हि मास्तु। णौ पर इत्यर्थे रेफेण व्यवधानात् पुस्कारयिषतीत्याद्यसिद्धिरिति बोध्यम्। ज्ञापनफलं तुतावयिषतीत्यादि॥

[3]तुल्यजातीयस्येति। (भा)

प्वादिघटितधात्वच्तुल्यस्याच आदेश इत्यर्थः। षष्ठ्यन्तस्य षष्ठ्यन्ताच इत्यनेनैवाच्चययोग्यत्वादिति बोध्यम्॥ अच्त्वेन तुल्यत्वं ह्रस्वतेरपीति पृच्छति

[4]कश्चेति॥ (भा)

उत्तरयति।

[5]यथा जातीयका इति। (भा)

प्वादिघटितधात्वच इत्यर्थः॥ प्वादिभिरच्सुल्यत्वासंभवात्।

[6]अवर्णपरा इति। (भा)

---

१ ओः पुयण्ज्यिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य। यदयमोः पुयण्ज्यपर इत्याह तज्ज्ञापयत्याचार्यो भवति णौ स्थानिवद्भाव इति॥

२ अ ६। पा १। सू ७१॥ ३ तुल्यजातीयस्य ज्ञापकम्। भा॥

४ कश्चतुल्यजातीयः। भा॥ ५ यथा जातीयकाः पुयण्ज्यः। भा॥

६ कथं जातीयकाश्चेते। अवर्णपराः। कथं जग्ले मग्ले। भा॥

अवर्णपरत्वसंपादकादेशस्थानिन इत्यर्थः। एवं चावर्णपरत्वसंपादकादेशस्थानित्वेन तुल्यतेति भावः। एवं च औननद् औजढ़द् इत्यादि चिन्त्यमेव। किं च यत्र द्विरुक्तौ परभागस्याद्योऽजवर्णस्तत्रेदमिति "द्विर्वचनेऽचि" इत्यादौ भाष्यकैयटयोः स्थितमिति माधवोक्तं कथं भाष्यारूढ़मित्यपि चिन्त्यमेवेत्याहुः॥

[1]अनैमित्तिकमात्त्वमिति। (भा)

अत एव [2]"ह्वावामश्च" इति क्रेञः कवाधनार्थं पुनरणिधानं चरितार्थमिति पर्य्युदासपक्षेऽप्यदोषम् [3]"आदेच" इत्यत्र भाष्यकारो वक्ष्यति॥

[4]अनच्कत्वादिति। (भा)

आटिटद् इत्यत्र णिलोपे धातोर्द्वितीयस्याऽहितत्वादित्यर्थो बोध्यः॥

---

१ अनैमित्तिकमात्त्वं श्निति तु प्रतिषेधः। भा॥

२ अ ३। पा २। सू २॥

३ आदेच उपदेशेऽशिति। ६। १। ४५। अथवा पुनरस्तु पर्य्युदासः। ननु चोक्तमश्नित्येकादेशे प्रतिषेध आदिवत्त्वादिति। नैष दोषः। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्यवधानम्। यदपि प्रत्ययविधिरित्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येजन्तेभ्य आकारान्तलक्षणः प्रत्ययविधिरिति यदयं "ह्वावामश्च" (३। २। २) इत्यणं कवाधनार्थं प्राप्नोति॥

४ आल्लोपोपधालोपणिलोपयणादेशेषु कृतेषु अनच्कत्वाद्द्विर्वचनं न प्राप्नोति॥

[1]पूर्वविप्रतिषेधेनाप्येतानीति। (भा)

"द्विर्वचनेऽचि" इति सूत्रसाध्यानि णौ स्थानिवदिति ज्ञापकसाध्यानि चेत्यर्थः॥

न हि नित्यानामिति। (कै)

आल्लोपादीनामित्यर्थः। "द्विर्वचनेऽचि" इत्यादेरभावे द्विर्वचनमनित्यम्॥ भाष्ये

[2]वक्ष्यति हीति। (भा)

[3]"दाश्वान् साह्वान्" इति सूत्रे॥

[4]यणाऽत्र भाव्यमिति। (कै)

यदीयङ्न स्यात् तर्हि स स्यादिति तत्संभावनासत्त्वादित्यर्थः। जग्लावित्याद्यर्थं वृद्धिपाठोऽप्यत्र बोध्यः। वस्तुतोऽत्र यणादिग्रहणमच्स्थानिकस्य द्विर्वचनात् परस्य विधेरुपलक्षणं बोध्यम्॥ सूत्रारम्भवादी आह

स पूर्वविप्रतिषेध इति॥ (भा)

उभयोः समतया तृतीयः पृच्छति

---

१ पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि॥

२ वक्ष्यति ह्याचार्यः। द्विर्वचनं यणयवायावादेश्चाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः। वा। द्विर्वचनं भवति विप्रतिषेधेन॥

३ दाश्वान्साह्वान्मीढ्वांश्च। ६। १। १२॥

४ "यणाऽत्र भवितव्यम्" इति कैयटेऽस्ति॥

[1]किं पुनरिति ॥ (भा)

स्थानिवद्भाव एव ज्यायानिति । (भा)

अयं भावः । अयं पूर्वविप्रतिषेधोऽन्तरङ्गाणां बाधको न वा । नाद्यः । बिभवनीयिषतीत्याद्यसिद्ध्यापत्तेः । किं चेष्टानिष्टविवेकस्य लक्षणैकचक्षुष्कैर्दुर्ज्ञेयत्वेन सर्वत्रैव पूर्वविप्रतिषेधवचनस्यावश्यकत्वेनेह नित्यान्तरङ्गबाधाय सुतरां वचनावश्यकत्वेन क्व सूत्रमताऽपेक्षया लाघवमिति ॥ अन्ये दूषणमाह

[2]ओदौदादेशस्येति । (भा)

अत्र समानाधिकरणबहुव्रीह्यङ्गीकारे चुचावयिषतीत्यादौ दोषः । स्थानिवत्त्वं लक्ष्विधित्वान्न इत्यत आह

ओदौतोरादेशो यस्मिन्निति । (कै)

इदमेव ज्ञापकमन्तरङ्गाणामिदमबाधकमिति न बिभवनीयिषतीत्यादौ दोषः । अत्र सनीत्यंशोऽपि पूरणीयः । अन्यथा दिदवनीयिषतीत्यादौ अनेनोत्त्वापत्तिः । तत्र कृते तु निर्दिष्टपरिभाषयाऽनेकव्यवधानान्न तत्र दोषः । एकणिज्व्यवधानं तु "येन नाव्यवधान"न्यायेन सङ्गत एव । नन्विदं वचनं जोः सौचाद् णिचि चङि सनि वाजीजवत् जिजावयिषतीत्यादावतिव्याप्तम् ।

---

१ किं पुनरत्र ज्यायः । स्थानिवद्भाव एव ज्यायान् । पूर्वविप्रतिषेधे* हि सतीदं वक्तव्यं स्यात् ॥

२ ओदौदादेशस्योद्भवति चुटुतुग्रादेरभ्यासस्येति ॥

---

* पूर्वविप्रतिषेधे ह्येदं वक्तव्यं स्यात् । इति पाठः किल्हरणसुद्रापितभाष्यपुस्तकेऽस्ति ॥

न च चकार एव पाठ्यः। गुङ्घुङ्भ्यां णिचि चङि सनि वाजू-गवदित्यादौ दोषापत्तेरिति चेन्न। जोर्नित्यस्याऽपि वाच्यत्वात्॥ ओदौतोः किम्। चिखादयिषति॥ क्ष्वित्यादि किम्। बिभाव-यिषतीत्यादि॥ यद्यपि क्ष्वो क्ष्वेदने चिच्छ्वासति दृत्यत्रैवाति-प्रसक्तं तथापि औसाहचर्य्यादोकारोऽपि लाक्षणिक एव गृह्यते तदादेशो वा औदादेशसाहचर्य्याद् अवेव गृह्यत इति न दोषः॥

ऊर्णुनावयिषतीति। (कै)

यद्यपि "पूर्वचाभिद्धौयमद्विले" दत्यस्यानित्यतया नुग्रब्दस्यैव द्विलेनाभ्यासंज्ञाप्रवृत्तिकाले द्वादिलाभावस्तथापि द्विले कृतेऽपि द्विलनिष्पन्नस्य कार्य्ये कर्त्तव्ये पूर्वचाभिद्धुत्वाभावबोधनात्तचानित्यत्व-कल्पने मानाभावाच्चैतत्प्रवृत्तिकाले द्वादिलमस्त्येवेति बोध्यम्॥

अभ्यासंज्ञाप्रवृत्तिसमय इति (कै)

एवं चाभ्यासंज्ञाप्रवृत्तिसमये परिनिष्ठितरूपे वा यच चुटुतु-ग्रादिलं तचास्य प्रवृत्तिरिति भावः। तचान्योदाहरणं चुचा-वयिषतीत्यादि न हि तचाद्यकाले तत्त्वं चु दृति कवर्गादिला-दित्याहुः॥ ननु णेर्द्विलनिमित्तत्वाभावेन स्थानिवत्त्वाभावाद्विभाव-यिषतीत्यादिसिद्धुमिति त्वयापीत्ययुक्तमत आह

[1]ओः धिति। (कै)

चुचावयिषतीत्यादिसिद्ध्यर्थमित्यर्थः॥

परार्थम् (भा)

दत्यच परशब्देन ज्ञापकापेचया परमित्त्वं विवचितमित्याह

---

१ अ ७। पा ४। सू ८०॥

इत्त्वार्थमिति । (कै)

"द्विर्वचनेऽची"ति स्थानिवत्त्वात् पिपविषते यियविषतीत्यादयर्थमित्यर्थः ॥

प्रसङ्गादिति । (कै)

वर्गप्रत्याहारजग्रहादित्यर्थः ॥

[1]सन्यत इङ्ग्रवतीति (भा)

विहितमित्त्वमिहानुवर्त्तमानं "परार्थं भविष्यती"ति भाष्येऽन्वयः । तत्र [2]"सन्यत" इत्यभिधानं स्वरूपेणेत्त्वमपूर्वं न भवतीति प्रदर्शनार्थं तद्भनयन्नाह

[3]अपूर्वमुत्त्वमिति । (कै)

अपूर्वत्वं तद्भावमात्रेण वैषम्यमस्याभिप्रेतमिति मत्वानस्तद्विघटयितुमाह परः ।

ममापि तच्छुत्त्वमिति ॥ (भा)

तद्व्याचष्टे

[4]उत्त्वमपीति । (कै)

नापूर्वत्वं तद्भावमात्रेण वैषम्यमभिप्रेतं किन्तु गौरवतद्भावाभ्यामिति दर्शयितुं भाष्ये

इत्त्वमपीति ॥ (भा)

---

१ अ ७। पा ४। सू ७९ ॥ २ अ ७। पा ४। सू ७९ ॥

३ इत्त्वार्थं प्रसङ्गात्तु ज्ञापकं त्वया त्वपूर्वमुत्त्वं वक्तव्यमित्यर्थः । कै ॥

४ उत्त्वमप्यन्यार्थं वक्तव्यं तदेवाधिकविषये उपजीव्यत इत्यर्थः ॥

तदुपपादयति

यचेति । (कै)

गुणावादेशयोरिति शेषः ॥

वक्तव्यमिति । (कै)

णोर्नेति वक्तव्यमित्यर्थः ॥

नन्वसतीति । (कै)

असत्यपीत्यर्थः ॥

यदीति । (कै)

लघुपरत्वाभावेत सन्वत्वाभावोऽचिकीर्त्तदित्यत्र दोषः । दिद्-वनीयिषतीत्यादावपि दोषो बोध्यः ॥

अथ तुल्येति । (कै)

अवर्णपरत्वं यत्राभ्यासोत्तरखण्डाद्यवर्णस्य अभ्यासंज्ञाप्रवृत्ति-समये परिनिष्ठितरूपे वा तत्र द्विर्वचनेनान्तरङ्गनित्ये बाध्येत इत्यर्थः ॥

चक्रतुरिति । (कै)

दिद्वनीयिषतीत्याद्यमिङ्गिरित्यपि बोध्यम् ॥

इति कालोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्ट-विरचिते महाभाष्यप्रदीपोद्द्योते प्रथमाध्यायस्य प्रथमे पादे अष्टमाह्निकम् ॥

महाभाष्यप्रदीपोद्योतः ॥

अदर्शनं लोपः । १ । १ । ६० ॥

ननु अपत्यादिवदर्थपरोऽदर्शनशब्द इति सिद्धैवार्थस्य संज्ञा इत्यत आह

[1]स्वंरूपमिति ॥ (कै)

नानुवादे इति । (कै)

तत्र हि न संज्ञाक्षतोऽभाव इत्यर्थः ॥ भाष्ये

[2]उक्तमिति । (भा)

[3]"नवेतिविभाषा" इत्यत्रेत्यर्थः ॥ असम्बद्धपदव्यवायान्नानुवृत्तिरत आह

[4]लोप इतीति । (भा)

तदर्थान्वययोग्यतायां अर्थ एव सत्वाददर्शनशब्दस्य तादृशार्थसंज्ञाकरणे फलाभाव इति भावः । प्रसक्तादर्शनस्येत्यर्थलाभार्थं स्थाने पदस्येवास्याप्यनुवृत्तिः सुलभा । "लुप्ऌ च्छेदने" इति धातो-

---

१ अ १ । पा १ । सू ६८ ॥

२ लोपसंज्ञायामर्थस्तोरुक्तम् । वा । किमुक्तम् । अर्थस्य तावदुक्तम् । इति करणोऽर्थनिर्देशार्थः (वा – अ १ । पा १ । सू ४४) इति ॥

३ अ १ । पा १ । सू ४४ ॥

४ चपु जतु इत्यत्राणोऽदर्शनं तत्रादर्शनं लोप इति लोपसंज्ञा प्राप्नोति ॥

र्थानुसारेणान्वर्थत्वासम्भवादिति तु भाष्यतात्पर्य्यम्। [1]"अभावो लोप" इति [2]अवसानसंज्ञासूत्रभाष्योक्तेरदर्शनशब्देन तत्समनियतो वर्णाभाव एवोक्तेति बोध्यम्। [3]"स्वं रूपम्" इत्यस्य प्रत्याख्याने तदनुवृत्तिं विनापि सिद्धिरिति बोध्यम्॥ नित्यग्रहणाश्रयणे इतरेतराश्रयपरिहारेऽयं दोष इत्याह

यदीति॥ (कै)

अत्र प्रत्ययो नाणित्याह

सोरिति॥ (कै)

ञ्णिति वृद्धिनिमित्ते इति। (कै)

[4]अङ्गसंज्ञासूत्रे प्रत्यासत्त्या प्रत्ययपदार्थयोरैक्याश्रयणात् वृद्धिविधौ ञ्णित्प्रत्ययनिरूपिताङ्गग्रहणाच्चतिभावः॥ [5]"चादिलोप" इति संग्रहायाऽऽह

अर्थादेति। (कै)

"एकवचनमुत्सर्गत" इत्यादिशास्त्रमर्थनिरपेक्षं विभक्तिप्रसञ्ज-

---

१ अभावो लोपः। ततोऽवसानं चेति। (विरामोऽवसानम्। १। ४। ११०। एतत् सूत्रस्य भाष्यम्)॥

२ अ १। पा ४। सू ११०॥ ३ अ १। पा १। सू ६८॥

४ अ १। पा ४। सू १३॥

५ चादिलोपे विभाषा। ८। २। ६३। चवाहाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता। चलोपे। इन्द्र वालेषु नोऽव। शुक्ला व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति। वालोपे। व्रीहिभिर्यजेत। यवैर्यजेत॥

कम्। अर्थाऽप्येकत्वादिर्विवक्षित एकवचनादिप्रसङ्गक इति बोध्यम्॥
ननु कथं प्रसक्तस्येति लभ्यतेऽत आह

स्थाने इति। (कै)

न च पित् कृता प्रकृत्याक्षेपेणापि तुग्वारयितुं शक्यः। आक्षेपे आक्षिप्तस्य शाब्देऽन्वये च मानाभावात्। अत्र चेदमेव भाष्यं मानम्। किं चानुपपद्यमानेन स्नोपपादकमाक्षिप्यते यथा पीनत्वेन रात्रिभोजनं नचैवं प्रकृते। न हि तत्सूत्रे आक्षेपं विना पित्त्वप्रत्ययानुपपत्तिरस्ति। नापि तदाक्षेपेण तदुत्पत्तिर्नापि [१]"प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरि"त्युपस्थितिः। अनियमप्रसक्त्यभावेन नियमफलायास्तस्या अनुपस्थितेरित्यावेदितम्। किं चाचैव प्रकृतिं विना प्रत्ययज्ञानसत्त्वेन व्यभिचारात्तदाक्षेपासम्भव इति दिक्। यत्तु ग्रामाधिकरणिका स्थितिरित्यर्थके ग्रामे तिष्ठतीति वाक्ये [२]"ल्यब्लोप" इति पञ्चम्यापत्तिवारणाय प्रसक्तस्य इत्यावश्यकमिति। तच्च। तेन प्रत्यासत्त्या ल्यबन्तार्थकर्माधिकरणयोरेव पञ्चमीविधानेनाचाप्राप्तेः। तत्रे लिप्तापत्तिः पञ्चम्या इत्यलम्॥

अर्थादिति। (कै)

कर्तृलक्षणादित्यर्थः॥

शास्त्रात्। (कै)

[३]"कर्मण्यण्" इत्यतः॥

---

१ परिभाषेन्दुशे – २४॥
२ अपादाने पंचमी (२। ३। २८) एतत् सूत्रस्यवार्त्तिकम्॥
३ अ ३, पा २। सू १॥

अणः प्रसङ्ग इति । (कै)

[1]"यस्मात्प्रत्ययविधिः" इत्यत्र विधिः प्रसङ्ग एव निविष्ट इत्यङ्गत्वमस्तीत्यभिमानः ॥

षष्ठीग्रहणमिति । (कै)

तच्च षष्ठ्यन्तं वैयधिकरण्येनाऽदर्शनान्नयीति बोध्यम् ॥

अचाऽपीति । (कै)

प्राप्तस्तः प्रसक्तिरेवाऽभिमतेति बोध्यमिति भावः । अर्थतोऽपि प्रसक्तिर्गृह्यते इत्युत्तरम् ॥

अणोऽन्येति । (कै)

परिहृत्य चाऽपवादविषयमिति न्यायेन प्रसङ्ग एव नास्तीति भावः ॥

प्रत्ययस्य लुक्श्लुलुपः । १ । १ । ६१ ॥

ननु लुगादिविधौ प्रत्ययादर्शनविधिर्यथा स्यादित्यर्थं प्रत्ययस्येतीत्यत आह

लुगादीति ॥ (कै)

साक्षादिति । (कै)

लुगणिञोरित्यादौ ॥

---

१ अ १ । पा ४ । सू १३ ॥

क्वचिदिति । (कै)

यथा [१]"लुग्वा दुह" इत्यादौ [२]"क्मस्से"ति ॥

क्वचिदिति । (कै)

वक्ष्यमाणसूत्रेषु वक्ष्यमाणयुक्तिभिरित्यर्थः ॥ ननु "अदर्शनस्येमाः संज्ञा" इति "अप्रत्ययस्यैता" इत्यनुपपन्नमत आह

अविद्यमान इति । (कै)

प्रतियोगिविशेषणत्वेनेति शेषः । वस्तुतोऽवसानसंज्ञासूत्रवक्ष्यमाणरीत्या प्रत्ययाभावस्यैवेमाः संज्ञा इति भाष्याभिप्रायः ॥ भाष्ये

गोरपीति । (भा)

[३]"गोस्त्रियोः" इति समुदायाऽनुवृत्तेरितिभावः ॥ ननु [३]"गोस्त्रियोः" इत्यत्र "स्त्रीति स्वरितगुणयुक्तं" इति [४]"स्त्रियाम्" इत्यधिकारविहितप्रत्ययग्रहणेन तदन्तग्रहणात्प्रत्ययान्तस्य लुक् स्यादिति तद्धितलुकि तन्निवृत्त्यर्थत्वमपि कुतो नोक्तमत आह

पञ्चेन्द्र इति ॥ (कै)

गोनिवृत्तिः प्रत्ययग्रहणं विनाऽपि सिध्यतीति शङ्कते

गोरिति ॥ (कै)

पञ्चगुः (कै)

इत्यत्र क्रीतार्थठको [५]"अध्यर्द्धे"ति लुक् ॥

---

१ अ ७। पा ३। सू ७३॥ २ अ ७। पा ३। सू ७२॥
३ अ १। पा २। सू ४८॥ ४ अ ४। पा १। सू ३॥
५ अ ५। पा १। सू २८॥

क्ङिति इति । (कै)

परत्वादितिभावः । अन्तरङ्गानपीति न्यायस्तु अन्तरङ्गनिमित्त-विनाशकप्रत्ययलुग्विषय इति तात्पर्य्यम् । न च समासान्ते तेन व्यवधानात् कथं लुक् । गोरित्यनुवृत्तिसामर्थ्येन लुक्प्राप्तेरिति-बोध्यम् ॥ नित्यशब्दाऽन्वाख्यानाभिप्रायेण शङ्कते

नन्विति ॥ (कै)

समुदायस्येति । (कै)

[1]"यस्येति च" इत्यकारलोपे सिद्धे लुग्विधानसामर्थ्येन सर्वा-देशः स्यादित्यर्थः ॥ ननु योगविभागे सूचभेदः कृतः स्यादत आह

एकयोगेति ॥ (कै)

"प्रकारान्तरम्" । योगविभागरूपम् ॥

छयतावितिः । (कै)

कंसात् [2]"प्राक्क्रीताच्छः" परशोः [3]"उगवादिभ्यो यत्" ॥ कंसे "कंसेः सः" परशौ आङ्परयोः "खनिशॄभ्यां डिच्च" इत्युप्रत्ययः ॥

अतः कृ इति । (कै)

धातौ सप्तमीनिर्दिष्टे तदादिग्रहणात् कमिग्रहणेनैव सिद्धे इति शेषः । कंसेसु कंस इति न रूपम् । अनभिधानादितिभावः ।

---

१ अ ६ । पा ४ । सू १४८ ॥ २ अ ५ । पा १ । सू १ ॥
३ अ ५ । पा १ । सू २ ॥

(प्रत्ययस्य लुक्श्लुलुपः। १। १। ६१।) (अ. १। पा. १। आ. ६)

अत एवेह "कमेः मः कंस" इति भाष्ये उक्तम्॥ नन्वेवमपि विशिष्टनिर्देशाऽभावे यञञोरपि लुक् स्यादत आह

यञञोरिति। (कै)

विकारावयवार्थप्रतीतये ह्यौत्सर्गिकाण एव लुकं विदध्यात्। न च यञञ्लुकां सामर्थ्याद्विकल्पोऽस्तु वेत्यनुक्तिस्तु यञञ्भ्यां मुक्त औत्सर्गिकाणः श्रवणाभावायेति वाच्यम्। यञञ्लुकामेककाल-प्रतीतानामुद्देश्यविधेयभावासम्भवात्। [१]"ण्यण्यलौ तुट् च" इत्यादौ तु [२]"अनद्यतन" इत्यादिनिर्देशाद्वाक्यभेदाङ्गीकारः। किं च [३]"कंसीयपरश्व्ययोः" इति षष्ठीनिर्देशादपि न यञञोर्लुक्। अन्यथा पंचम्येव निर्दिशेदितिभावः॥

प्रकृतीति। (कै)

प्रकृतिव्यतिरिक्तप्रत्ययान्तरवाची अन्यशब्दः। तेन नञा समासे प्रकृतिरुच्यते इत्यर्थः॥ भाष्ये

[४]ङ्याबिति। (भा)

प्रातिपदिकात्परस्य लुगित्यर्थे यञञोर्विधानसामर्थ्याल्लुगभावे

---

१ अ ४। पा ३। सू २३॥

२ अ ३, ५। पा २, ३। सू १११, १५, २१॥

३ अ ४। पा ३। सू १६८॥

४ ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थम। वा। यच्छयोश्च लुगर्थम्। वा (४। १। १)॥

उभयोः प्रातिपदिकात्परत्वाभावेन परिशेषात् [1]कंसीयाद्यवयव-प्रातिपदिकात् परयोर्ष्ठ्यतोरेव लुगित्यर्थः॥

विशिष्टेति। (कै)

जनपदार्थकप्रत्ययसम्बन्धिन इत्यर्थः॥ भाष्ये

प्रकृतमिति। (भा)

अत एव [2]"लवणाल्लुग्" इत्यत्र प्रकृतठक एव लुगिति बोध्यम्। शोभनाः पंचाला इत्यादौ इति पाठः उचितः॥

अनन्तरस्येति। (कै)

अव्यवहितस्येत्यर्थः। [3]जनपदार्थवाचके शब्दे सति तदनन्तरस्य लुबित्यर्थः इति भावः॥ वार्त्तिककृदभिमतषष्ठीनिर्देशार्थत्वमुपपादयति

[4]आगस्त्येति॥ (कै)

चय इति। (कै)

एवं च वैषम्याद्यथासंख्याप्राप्तेरगस्त्ययोऽपि कुण्डिनाः कुण्डिनास्यागस्त्यः स्युः। लुक् च ज्ञापकात् सर्वादेश इति विभक्तिमात्रं श्रूयेतेतिभावः॥

द्वावेवेति। (कै)

तेन नोक्तापत्तिरितिभावः॥

---

१ कंसीयपरशव्ययोर्यञञौ लुक् च। ४। ३। १६८॥

२ अ ४। पा ४। सू २४॥

३ जनपदे लुब् (इत्यनेन) ४। २। ८१॥

४ अ २। पा ४। सू ७०॥

सर्वचेति । (कै)

अजादिप्राग्दीव्यतीयविषयेऽपीतिभावः ॥

अवृद्धत्वादिति । (कै)

यद्यपि स्थानिवद्भावेन वृद्धत्वाच्छः सिध्यति तथाप्यवृद्धत्वात् प्रकृतेश्छस्य वृद्धनिमित्तत्वाच्च आकारश्रवणं न स्यादिति भावः । सन्नियोगशिष्टत्वाद्गस्यादेशाभावे प्रतिषेधप्रयुक्तलुगभावो हेतुः ॥

गोत्रे विहित इति । (कै)

नन्वागस्त्यस्य गोत्रप्रत्ययान्तस्यैव ग्रहणं न तु अनन्तरापत्य-प्रत्ययान्तस्येत्येतदर्थं तदनुवृत्तिरस्यात् । [१]"गर्गादिभ्य" इत्यत्रैव गोत्र इति निवृत्तेश्छस्य साधारणोऽगस्त्यप्रकृति [२]श्छण्णन्त एवा-ऽत्रागस्त्यः न त्वगस्तिप्रकृतिक [३]गर्गादियञन्तः । [४]"यञञोश्च" इति लुका सिद्धत्वादिति चेन्न । कौण्डिन्यमाहच्छ्यणागस्त्यस्यापि गोत्रप्रत्ययान्तस्यैव ग्रहणाद् भाष्यमते गोत्रसंज्ञासूत्रपर्य्यन्तं गोत्रा-धिकारेण छ्यणन्तस्यापि तत्त्वाच्च । वस्तुतो वार्त्तिककारस्यापीत्य-मेव सम्मतमित्याह

वचनेति ॥ (कै)

सामर्थ्यान्नोपस्यैव सर्वादिग्रहं कुतो न कल्प्यत इत्यत आह

विपर्य्यय इति । (कै)

न उपसंजातो विरोधो वैयर्थ्यमङ्गोद्भव यस्य तत्त्वादित्यर्थः ॥

---

१ च ४ । पा १ । सू ११२ ॥ २ च ४ । पा १ । सू ११४ ॥
३ च ४ । पा १ । सू १०५ ॥ ४ च २ । पा ४ । सू ६४ ॥

नत्वयमिति । (कै)

अयम् अवयवदाहादौ समुदायदाहादिव्यपदेशो गौणो न किन्तु मुख्य एव अवयवलोपे समुदायस्यापि लोपादित्यर्थः ॥

अनुनासिकेति । (कै)

[१]"अनुदात्तोपदेश" इत्यनेन ॥

आघ्रीत (भा)

इत्यत्र [२]"आङो यमहन" इत्यात्मनेपदैकवचनम् ॥

[३]संग्मीयेति । (भा)

गमेर्विधिलिङि [४]"समो गमो"त्यात्मनेपदे इटि ग्मपो "बहुलं छन्दसी"ति लुकि लिङः सलोपे इटोऽति उपधालोपे रूपम् । तत्र प्रत्ययलक्षणेन झलादिङित्परत्वादनुनासिकलोपः स्यात् । इदं च प्रयोजनम् अप्राधान्येनालाश्रयणे विध्यर्थं प्रत्ययलक्षणसूत्रमिति वार्त्तिकमते बोध्यम् ॥

प्रत्ययलोपे प्रत्ययलक्षणम् । १। १। ६२॥

लक्षणशब्दार्थमाह

---

१ अ ६ । पा ४ । सू ३७ ॥ २ अ १ । पा ३ । सू २८ ॥

३ बहुषु भाष्यपुस्तकेषु "सं रायस्योषेण ग्मीयेति" इति पाठोऽस्ति । इंलण्डीयभाष्यपुस्तके "रायस्योषेण संग्मीयेति" इति पाठोऽस्ति ॥

४ अ १ । पा ३ । सू २९ ॥

[१]निमित्तमिति ॥ (कै)

कार्य्यमिति । (कै)

बहुव्रीहिवच्चभ्यम् ॥

प्रत्यासत्त्येति । (कै)

क्रियमाणेऽपि प्रत्ययग्रहणेऽन्यप्रत्ययलोपेऽन्यप्रत्ययनिमित्तकार्य्य-वारणाय प्रत्यासत्तिराश्रयणीयेति भावः ॥ ननु "प्रत्ययलक्षणम्" इत्यस्य बहुव्रीहितयाऽनेन स्वान्यभावेऽप्राप्तकार्य्यप्रापणायातिदेश इति अत्र प्रत्ययस्य सत्त्वेन किं तन्निमित्तकार्य्यातिदेशेनेत आह

प्रत्ययस्य लक्षणमिति । (कै)

यस्य लोपस्तस्मिन् सति यः प्रत्ययो भवति तस्य तल्लोपेऽपि प्रादुर्भाव इत्यर्थलाघवात् षष्ठीतत्पुरुष एव स्यादिति तात्पर्य्यम् ॥ रमेः क्यनि हन्तेश्च के [२]"अनुदात्त" इत्यनुनासिकलोपेऽगुरुपो-त्तमत्वादप्राप्तः ष्यङतिदेशतः स्यादित्यर्थः ॥

एवं हि लोपेति । (कै)

ननु [३]"णेरनिटि" इत्यादिसामर्थ्यात् माभूत्तत्र प्रवृत्तिः । यत्तु सामान्येन लोपो णाविष्टवद् इति सोऽप्रत्ययविषये चरितार्थ इति भिचुमाचष्टे भिचयतीत्यत्र पुनः प्रादुर्भावार्थमिदं स्यादिति

---

१ "प्रत्ययग्रहणं किमर्थम्"। इति भाष्यमुपादाय "प्रत्ययनिमित्तं कार्य्यं लोपे भवतीत्युक्ते प्रत्यासत्त्या प्रत्ययस्यैव लोप इति विज्ञास्यत इति भावः" इत्युक्तम् ॥

२ अ ६ । पा ४ । सू ३७ ॥ ३ अ ६ । पा ४ । सू ५१ ॥

चेन्न। एवं हि तत्रैव प्रत्ययस्य न लोप इति वदेत्। एवं च गुरुतरन्यासो ज्ञापक इति बोध्यम् ॥

अन्यथा । (कै)

व्याख्यानस्य प्रमाणत्वाभावे ॥

पदसंज्ञा न स्यादिति । (कै)

तिङन्तत्वाऽभावादिति भावः ॥

लोपे प्रत्यय इति । (कै)

अस्य प्रादुर्भवतीति शेषः ॥ ननु प्रत्ययलोप इत्युक्ते कथं सति प्रत्यय इति लभ्यतेऽत आह

प्रत्यय इति ॥ (कै)

यत्कार्य्यमिति । (कै)

प्रत्ययलक्षणं यत्कार्य्यं दृष्टमित्यर्थः ॥

ननु [१]"जगद्" इत्यादौ विलोपात्परत्वात् पूर्वं [२]"गमः क्वौ" इत्यनुनासिकलोपे क्विपि सत्यपि तुकः प्राप्तेराह

अचेति ॥ (कै)

भिन्नविषयत्वादिति । (कै)

वार्त्तिकमते एतत्। अचिरादेशे नुडपवादत्वपरभाष्यरीत्या विषयभेदेऽपि तत्त्वे तु लोपेनानुत्पत्तेरेवान्वाख्यानेनापवादत्वं नेति बोध्यम् ॥ वैयात्याद्व्याख्यायाङ्गीकारे दोषमाह

---

१ द्युतिस्वाप्योर्नां हे च (वा ३। २। १७८) ॥

२ अ ई। पा ४। सू ४० ॥

सति त्विति ॥ (कै)

एकमेवेति । (कै)

अवयवस्य प्रत्ययत्वपर्य्याप्त्यधिकरणत्वाभावादितिभावः । एवं चानयोः फलान्तराभिनिवेशो भाष्यविरुद्ध इति बोध्यम् ॥ ननु द्वितीयप्रत्ययग्रहणाभावे बह्वन्नौह्यलाभात्तल्लभ्यकार्य्यातिदेशो न सिध्येदत आह

[1]तल्लक्षणमिति ॥ (कै)

वस्तुमात्रेति । (कै)

प्रत्ययमात्रेत्यर्थः ॥

प्रत्ययनिमित्तमेवेति । (कै)

प्रत्ययत्वेन प्रत्ययनिमित्तमित्यर्थः ॥

न वर्णेति । (कै)

प्राधान्येन वर्णनिमित्तमित्यर्थः ॥ ननु रैकुलमित्यचायादेशो न प्रत्ययाश्रयः किन्तु तदवयवाश्रयोऽत आह

अवयवद्वारेणेति । (कै)

केचित्तु प्रत्ययग्रहणमित्यस्य द्वितीयप्रत्ययपदघटितं प्रत्ययलक्षणग्रहणमित्यर्थः । प्रत्ययलोपेऽपीत्येव सूत्रं कार्य्यम् । अस्य तद्भवति यत्प्रत्यये मतौति शेषः । स्थानिवदित्यनुवृत्तिर्वा ॥

---

१ प्रत्ययलोपे तल्लक्षणमित्युच्यमाने प्रत्ययस्य यत्र कार्य्ये निमित्तभावः प्रत्ययरूपाऽऽश्रयेण वर्णरूपताऽऽश्रयेण वा तत् सर्वं स्यात् । सर्वनाम्नो वस्तुमात्रपरामर्शित्वात् । प्रत्ययग्रहणे सति प्रत्ययनिमित्तमेव कार्य्यं प्रत्ययलोपे भवति न वर्णरूपतानिमित्तम् ॥

प्रत्ययलक्षणमिति। (भा)

प्रत्ययत्वतद्व्याप्यान्यतरधर्मावच्छिन्नलक्षणमित्यर्थः॥

वर्णलक्षणं (भा)

वर्णत्वव्याप्यधर्मावच्छिन्ननिमित्तं प्रत्यये सति वर्णनिमित्तं भवतीति तल्लोपेऽपि स्यादितिभावः॥ कैयटव्याख्या तु चिन्त्या। प्रकृते तच्छब्दप्रत्ययग्रब्दयोः पर्य्यायत्वेन तद्विचारस्याऽयुक्तत्वापत्तेरित्याशयः॥

[1]अनेनैवेति। (कै)

अत्र प्रत्ययग्रहणसामर्थ्यात्तथार्थलाभेऽपि तत्र तादृग्रार्थग्रहे न मानम्। [2]"आर्द्धधातुक" इत्यस्य कैयटरीत्या तोतोर्तीत्यादिव्यावृत्त्या चरितार्थत्वात्। पूर्वसूत्रे आर्द्धधातुकग्रहणमनवकाग्रमिति [3]"क्ङिति च" इति सूत्रस्थभाष्यविरोधाच्चावृत्त्यादिना तथार्थकल्पने तु न मानम्। किं च तथार्थकल्पने [4]"यङ्यक्क्यवलोपे" इति वार्त्तिकं तदुदाहरणपरं "जीरदानुः" इति भाष्यं चासंगतं स्यादिति चिन्त्यमेतत्॥

---

१ उपलब्धविवरणपुस्तके "अनेनैव" इति "एव"कारघटितप्रतीकोऽस्ति। कैयटे तु "अनेन" इत्येवास्ति। अनेन नागेशभट्टीयकैयटपुस्तके एवकारघटित एव पाठोऽस्तीत्यनुमीयते॥

२ अ १। पा १। सू ४॥ ३ अ १। पा १। सू ५॥

४ तथाच भाष्यम्। "परिगणनं कर्त्तव्यम्। यङ्यक्क्यवलोपे प्रतिषेधः। वा। यङ्यक्क्यवलोपे प्रतिषेधो वक्तव्यः। यङ्। वेभिदिता मरीभृजः॥ यक्। कुधुमिता मगधकः॥ क्य। समिधिता दृषदकः॥ वलोपे। जीरदानुः"। (१। १। ४)॥

सुधे (कै)

इत्यादि धिविक्त्योर्नुमि विचि वलोपेऽपृक्तलोपे गुणे सुना समासे सौ हल्ङ्यादिलोपसुलोपयोरिमे रूपे। गुणनिषेधे तु सुधिन् शब्दे [१]"दूनूहन्" इति दीर्घः। सुक्षणः "सर्वनामस्थाने च" इति दीर्घः। [२]"उपधायाश्च" इति दूत्वे रपरत्वे सुनलोपयोः [३]"वेः" इति दीर्घः स्यादितिभावः ॥

स्थानिवद्भावेनेति। (कै)

वर्णाश्रयस्य तवाऽप्यनिष्टत्वादित्यर्थः ॥ ननु शास्त्रस्य कर्तृत्वे सतः कर्मत्वेन [४]"उभयप्राप्तौ" इति नियमा[५]"च्छास्त्रस्य" इति षष्ठ्यनुपपन्ना [६]"कर्मणि च" इति समासनिषेधापत्तिश्च करणत्वे तु षष्ठ्युपपन्नेत्यत आह

शास्त्रमिति। (कै)

शेषत्वेन "उभयप्राप्तौ" इत्यस्याप्राप्तेः षष्ठीसमासौ नाऽनुपपन्नाविति भावः ॥

आचार्यः स्मर्त्तेति। (कै)

फलितार्थकथनं स्मर्चाऽऽचार्य्येणेति त्वन्वाख्यायत इत्यन्वययोग्यम् ॥

---

१ अ ६। पा ४। सू १२ ॥ २ अ ७। पा १। सू १०१ ॥
३ अ ८। पा २। सू ७६ ॥ ४ अ २। पा ३। सू ६६ ॥
५ प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य । वा। प्रत्ययलोपे प्रत्ययलक्षणमित्युच्यते सदन्वाख्यानाच्छास्त्रस्य । सच्छास्त्रेणान्वाख्यायते सतो वा शास्त्रमन्वाख्यायकं भवति सदन्वाख्यानाच्छास्त्रस्य ॥
६ अ २। पा २। सू १४ ॥

स्वतन्त्रत्वमिति । (कै)

करणस्य कर्तृत्वविवक्षेतिभावः ॥

अल्विधित्वादिति । (कै)

दमादेरितिग्रहेषः ॥ वर्णाश्रयेति तु वर्णप्राधान्यविषयकम् । एवं चाप्राधान्येनाश्रयणे विध्यर्थं सूत्रमितिभावः ॥ भाष्ये

अस्ति प्रयोजनमेतदिति । (भा)

उक्तप्रयोजनविशिष्टं सूत्रं निर्दोषं वेति काङ्क्षा प्रश्न इति बोध्यम् ॥

किं तर्हीति । (भा)

मम तु निर्दोषमेव तव कश्चिद्दोषप्रतिभासोऽस्ति चेद्वदेति प्रश्नगर्भमुत्तरम् ॥

बाधनादिति । (कै)

एवं च "पञ्च" इत्यादौ पदत्वं न स्यादितिभावः ॥

उपलक्षणार्थत्वादिति । (कै)

तयोरपि पूर्वपक्षबीजस्य समत्वादितिभावः । तत्र स्नुलुपोः प्रत्ययलक्षणस्य फलं चिन्त्यम् । लुकि तु पञ्चेत्यादौ पदत्वं फलमस्ति ॥

समावेशदर्शनादिति । (कै)

क्तक्त्यादिष्विति भावः । लोपः संज्ञा यस्येति बहुव्रीहौ मत्वर्थीयानुपपत्तिस्खाल्लेन षष्ठीसमासेऽर्थाऽसङ्गतिरत दन्नन्तेन षष्ठीसमास इत्याह

लोपस्येति ॥ (कै)

सङ्कर इति। (कै)

परस्परं लोपशब्दभावितप्रत्ययादर्शनविषये लोपसंज्ञया चेत्यर्थः। प्रत्ययादर्शनमात्रं सकलं लुमलंज्ञं प्राप्नोतीति भाष्याऽक्षरार्थः॥

[1]उतो वृद्धिरिति। (पा)

न च तत्र [2]"नाभ्यस्तस्य" इति वर्त्तनाद्दोषः। अत्र पक्षे व्यभिचाराभावात् तदनुवृत्तेर्वक्तुमशक्यत्वात्॥

हरीतकीति। (कै)

नन्वत्र सत्यपि ङीषो लुकि युक्तवद्भावात् पुनर्ङीष् स्यादिति चेन्न। लक्ष्ये लक्षणस्येति न्यायादित्याऽऽहुः। हरितक्यां [3]"हरितक्यादिभ्यश्च" इत्यणो लुप्। यद्वा हरीतकीवेयं गतिकृतिरिति कनो लुप्। लवण इत्यत्र [4]"लवणाल्लुक्"॥ तद्भावितग्रहणे युक्तिमाह

तच्चाश्रितेति। (कै)

आश्रितः स्वरूपस्य व्यापारोऽदर्शनविषयो यैस्ते तथोक्ता इत्यर्थः। अदर्शनबोधका लुगादिशब्दाः प्रत्ययादर्शनस्य संज्ञेत्युक्ते प्रत्यासत्त्या यया संज्ञया यददर्शनं भाव्यते तस्यैव सा संज्ञेति लभ्यते इति भावः॥ प्रत्यासत्तिस्तूर्वैर्दुर्ज्ञेयेत्यत आह

आहृत्तिर्वेति। (कै)

तेन लुगादिशब्दभावितमदर्शनं क्लेन तत्संज्ञमित्यर्थः॥ अदर्श-

---

१ अ ७। पा ३। सू ८९॥ २ अ ७। पा ३। सू ८७॥
३ अ ४। पा ३। सू १८७॥ ४ अ ४। पा ४। सू २४॥

नस्य नित्यत्वेऽपि तङ्गावितत्वस्य शास्त्रायत्तत्वादितरेतराश्रयत्वं तदवस्थमेवेत्यत आह

भाविसंज्ञेति ॥ (कै)

तङ्गावितग्रहणपक्षे [1]"यथैव" इत्यादिग्रन्थोऽनुपपन्न इत्यत आह

[2]तिस्रृणामिति। (कै)

इतरेतराश्रयपरिहाराय भाविसंज्ञाविज्ञाने गौरवाऽऽपत्त्या सामर्थ्यात्तिस्रृणामसङ्करः प्रतिपादितो न तु तङ्गावितपक्षाश्रयेणेत्यभिमानः ॥

वैयधिकरण्यादिति।

भवनक्रियायां प्रकृतेः कर्तृत्वादितिभावः ॥

क्वचिद्विकारस्येति। (कै)

वस्तुतो वृत्तौ तदाख्ये च सर्वत्र प्रकृतेरेव कर्तृत्वं विकृतिशब्दस्यापि गौण्या प्रकृतिवृत्तित्वात् सामानाधिकरण्यम्। अत एव गौणत्वान्महच्छब्दे आत्वाभावो गोमतीशब्दे तु गोमतीनदीभिन्ना गोमतीनदीभूतेत्यर्थेनाभाषितपुंस्कत्वात् पुंवत्त्वाभाव इति बोध्यम् ॥ भाष्ये

एवं लोपेति। (भा)

एवं लोपसंज्ञायामपि तङ्गावितग्रहणं मन्वानस्य चोद्यमेतत्।

---

१ "यथैव तर्ह्यदर्शनसामान्यात्लोपसंज्ञा लुमत्संज्ञा अवगाहत एवं लुमत्संज्ञा अपि लोपसंज्ञामवगाहेरन्"। भा ॥

२ तिस्रृणां संज्ञानां विधानसामर्थ्यात् परस्परविषयावगाहनं तासां माभूत्। लोपसंज्ञाविषये तु ताः प्रवर्तेरन् ॥

अत्र सामर्थ्यात् तद्भावितग्रहणेऽपि लोपसंज्ञायां तद्ग्रहणे मानाभावः । न च लुगादिभ्यो लोपसंज्ञायाः पृथक्करणं मानं तस्याः प्रयोजनान्तरसत्त्वादित्याह

[1]अस्त्यन्यदिति ॥ (भा)

तद्दर्शयति

लोपमात्रे इति । (भा)

भाष्ये ॥ स्वयमप्रयोजनान्तरमप्याह

प्रत्ययाप्रत्ययेति ॥ (कै)

भाष्ये

लुमति प्रतिषेधादिति । (भा)

भवतु लोपसंज्ञायामपि तद्भावितग्रहणं [2]"न लुमतेति" निषेधेन तत्र लोपत्वनिमित्तकार्य्यप्रवृत्तिर्ज्ञाप्यते इत्यदोष इति भावः ॥ लुक्युपसंख्यानम् इति दोषे परिहृते दोषान्तरमाशङ्कते

सतो निमित्तेति ॥ (भा)

वार्त्तिकतद्व्याख्यानयोर्विरोधं परिहरति

निमित्तशब्देनेति ॥ (कै)

नन्वेवं पदत्वेऽपि भत्वस्याऽपि सत्त्वाद्लोपः स्यादत आह

अलोपस्त्विति ॥ (कै)

---

१ अस्त्यन्यल्लोपसंज्ञायाः पृथक्करणे प्रयोजनम् ॥

२ अ १। पा १। सू ६३ ॥

कालविप्रकर्षेति । (कै)

अस्य चोत्तरस्य नाऽयमवसर इत्यर्थः ॥ भाष्ये

एतत् । (भा)

वक्ष्यमाणवाक्यार्थरूपम् ॥

पदसंज्ञाद्वयमिति । (कै)

अनया पदसंज्ञया न लोपो भविष्यतीत्यादिभाष्यार्थः ॥

यष्ठेति । (कै)

वर्णप्राधान्यविषय एव स निषेध इति भावः ॥ भाष्ये

[1]पर्य्यवपन्नानि । (भा)

स्मृतानि । अप्राप्तानीति यावत् ॥ नन्वेतत्कार्य्यातिदेशे स्यात् स एव कुतः शास्त्रनिमित्तातिदेशयोरपि सम्भवादत आह

कार्य्यस्येति ॥ (कै)

व्यपदेशः । (कै)

निमित्तम् ॥

विधीयेते इति । (कै)

इत्यभिमान इतिशेषः ॥ वस्तुतः कार्य्यशास्त्रातिदेशयोरभेद एवेत्युक्तम् ॥ भाष्ये

एकयोगलक्षणानि चेति । (भा)

तादृशानि विप्रतिषेधविषयत्वेन न प्रकल्प्यन्त इत्यर्थः ॥ ननु

---

१ इह लुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्य्याणि पर्य्यवपन्नानि भवन्ति अन्ये तेन प्रत्युत्याप्यन्ते ॥

अन्यभाव इति षष्ठीतत्पुरुषः कर्मधारयो वोभयथापि व्यञ्जनुपपन्नो भावस्य भावान्तरेणायोगात्समाससंज्ञाया बाधाच्चार्थासंगतेश्चेत्यत आह

अन्यो भाव इति। (कै)

भाव्ये ऽन्यरूपमापन्नस्येत्यर्थकम् "अन्यभूतस्य" इत्येतत्तु फलितार्थो बोध्यः॥

स्वार्थ इति। (कै)

चातुर्वर्ण्यादित्वात्॥ ननु सत्ता स्थानिनश्चेद्विरुद्धमतिदेशसहस्रेण सत्ताया अशक्यत्वाच्चात आह

कृदादिव्यपदेशस्येति। (कै)

एतदर्थमेव स्थानिसंज्ञानुदेशादित्युक्तं न तु स्थान्यनुदेशादिति। तथा सति स्थानिकार्यातिदेश एव स्यादितिबोध्यम्॥ भाष्ये शङ्कितोऽऽह

[1]तद्वक्तव्यमिति। (भा)

वचनान्तरेण सूत्राद्येपपरिहारो न युक्त इति भावः॥ परिहरति

यद्यपीति॥ (भा)

अथवैतर्हीति। (भा)

तथापीत्यर्थः। एवं लघुतरत्वाद्वचनान्तरेणाऽपि परिहारो युक्त इतिभावः॥

---

१ तद्वक्तव्यम्भवति॥

संज्ञामिति। (कै)

निमित्तभूतव्यपदेशमित्यर्थः॥ ननु संज्ञासंज्ञिनोर्भेदाद्ङ्कोर्हन्तिः संज्ञेत्ययुक्तमत आह

सूचोपात्त इति॥ (कै)

फलान्तरमपि वचनान्तरारम्भे दर्शयति भाष्ये

भेत्यादि॥ (भा)

सिद्धमिति। (भा)

दृष्टमिति शेषः। वक्ष्यमाणान्यखिधिलाद्वार्त्तिकमते नाऽतिदेशेन भविष्यन्ति। सूचारम्भे तु वर्णाश्रये इत्यस्य वर्णप्राधान्यविषयलादतिदेशेन स्युरेवेतिभावः॥

चिचेति। (कै)

[1]"नचचेण युक्त" इत्यणो [2]"लुबविशेषे" इति लुप्। युक्तवद्भावात् स्त्रीत्वं ततो जातेऽर्थे [3]"सन्धिवेलादी"त्यणो वार्त्तिकेन लुगितिभावः। न चाणो लुकि [4]"लुक् तद्धिते"ति टापो लुकि पुनष्टाब् दुर्लभो लक्ष्ये लक्षणस्येति न्यायादिति वाच्यम्। जातगत स्त्रीत्वबोधनरूपफलस्यासिद्धतया प्रवृत्तेः॥

अत इत्यधीति। (कै)

अकारान्तादण् इत्यर्थः॥

---

१ अ ४। पा २। सू ३॥ २ अ ४। पा २। सू ४॥
३ अ ४। पा ३। सू १६॥ ४ अ १। पा २। सू ४६॥

ननु वतण्डात् स्त्यपत्ये यञो [१]"लुक् स्त्रियाम्" इति लुकि प्रत्ययलक्षणेन [२]"प्राचाम्" इति प्राप्तं ष्फं बाधित्वा परत्वाद् ङीन् स्यात् [३]"गार्ङ्गरवादि" पाठादत आह

यथेति । (कै)

तच्च हि सूत्रे यत्र इति वर्त्तते ॥

सर्वचग्रहणादिति । (कै)

तद्धि पूर्वसूत्रेऽपलक्ष्यते ॥

[४]आतोऽमिति । (पा)

एकादेशविधायकं हि तत् ॥

अचीति । (कै)

अजाद्योरित्यर्थः । अत एव तद्धितग्रसो निवृत्तिः ॥ भाष्ये सूत्रारम्भवादी वचनान्तरवादिनं प्रतिदूषणमाह

तस्य दोष इति । (भा)

स्थानिसंज्ञानुदेशादित्यस्येत्यर्थः ॥

इत्त्वम् । (भा)

[५]"ग्राम इदङ् हलोः" इति ॥

इम् । (भा)

[६]"तृणह" इत्यनेन ॥ भाष्ये

---

१ अ ४ । पा १ । सू १०६ ॥ २ अ ४ । पा १ । सू १७ ॥
३ अ ४ । पा १ । सू ७३ ॥ ४ अ ६ । पा १ । सू ६३ ॥
५ अ ६ । पा ४ । सू ३४ ॥ ६ अ ७ । पा ३ । सू ६२ ॥

वक्ष्यत्यत्रेति। (भा)

नङौति ङौ नलोपप्रतिषेधाद् ज्ञापकात् प्रत्ययलक्षणेन भसंज्ञानेत्येवं रूपमनुपदमेतत्सूत्र एवेत्यर्थः॥

शास्त्रपरेति। (भा)

उपदेशशास्त्रपरेत्यर्थः। अतिदिश्यमान कार्य्याणामुत्पत्तिदेश एव विप्रतिषेधशास्त्रोपयोगीतिभावः॥ तदाह

सति प्रत्यये इति। (कै)

इदं सूत्रं तत्तच्छास्त्रनिमित्तसम्पादनद्वारा तत्तच्छास्त्रप्रवृत्ति-सम्पादकमितिभावः। अत एव पूर्वं तान्यनेन प्रत्युत्थाप्यन्ते इत्युक्तम्। तानि तत्कार्य्यबोधकानि शास्त्राणीति तदर्थः उचितो न तु कार्य्याणि क्रियन्त इत्यर्थः। क्रियन्त इत्यस्यैव वक्तुमुचितत्वात्। अत एव [1]"टित आत्मनेपदानाम्" इति सूत्रे पर्यवपादो रूपान्तरापत्तिरित्युक्तं कैयटेन विद्यमानस्य हि रूपान्तरापत्तिर्भवति शास्त्रमेव च विद्यमानं न तु कार्य्यं तस्य रूपान्तरमेतद्विषयं कार्य्यान्तरप्रवर्त्तकत्वम्। एवं च पर्य्यवपन्नत्वमपि शास्त्रस्येत्यन्ये॥ भाष्ये

कानि पुनरिति। (भा)

पूर्वमेतत्सूत्रकरणे का युक्तिरिति युक्तिप्रश्न इदानीं तु

---

१ अ ३। पा ४। सू ७९॥

प्रयोजनप्रश्न इति न पौनरुक्त्यमत एव सदृत्याख्यानादिति प्रागुक्तमेतत् ॥

यद्यप्यस्विध्यर्थमिति । (कै)

इदमितिशेषः ॥

विशेषविहितत्वादिति । (कै)

प्रत्ययविषये शीघ्रोपस्थितिकत्वादित्यर्थः ॥

चौ ते (भा)

इत्यादौ [१]"शेश्छन्दसी"ति लोपः ॥ "नुम्" फलं तु दीर्घः ॥

आश्रित्येति । (कै)

अपवादबाधकबाचनिकपूर्वविप्रतिषेधाश्रयणेनेतिभावः । [२]न्यायेन पूर्वं लोपप्राप्तेरत्यल्पविषयत्वात् ॥

विशेषविहितत्वादिति । (कै)

येननाप्राप्तिन्यायेनापवादत्वादित्यर्थः ॥

तदेति । (कै)

[३]"अपवादविषयं परित्यज्ये"ति न्यायेनापवादविषये उत्सर्गा-

---

१ अ ६ । पा १ । सू ७० ॥

२ "न्यायेन पूर्वम्" इत्यारभ्य "विषयत्वाद्" इत्यन्तं नास्ति – क – ग – पुस्तके ॥

३ प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते । परिभाषेन्दु – ६३ ॥

प्रवृत्तेरितिभावः। [१]"यदी"त्यनेन विषयभेदादपवादत्वमेव नास्तीति सूचितम्। यदि तु [२]"नुड्विषये रप्रतिषेधो वक्तव्य" इत्यादिभाष्यमिऋभाष्येण विषयभेदेऽप्यपवादत्वं तर्हिप्रत्ययलोपस्थलेऽनुत्पत्तिरेवाव्याख्यायते इति [३]मरुपसूत्रस्थभाष्ये उक्तत्वेनापवादत्वसंभावनैव नेत्याशङ्कः॥

[४]इतीयडिति। (कै)

---

१ "कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनमष्टक्नसिलोपे नुममामौ गुणवृद्धी दीर्घत्वेमडाट्श्रम्बिधयः। वा। अष्टक्नलोपे सिलोपे च कृते नुममामौ गुणवृद्धी दीर्घत्वमिम्अडाटौ श्रम्बिधिरिति प्रयोजनानि। नुम्। अग्ने चीते वाजिना चौ षधस्था। ता ता पिण्डानाम्। नुम्॥ अमामौ। हे अनड्वन् अनड्वान्॥ गुणः। अधोक्। अलेट्॥ वृद्धिः। न्यमार्ट्॥ दीर्घत्वम्। अग्ने चौ ते वाजिना चौ षधस्था। ता ता पिण्डानाम्॥ इम्। अष्टगेट्॥ अडाटौ। अधोक्। अलेट्। ऐयः। औनः॥ श्रम्बिधिः। अभिनोऽच। अच्छिनोऽच"। भा॥ "अनड्वन्" इति भाष्यमुपादायोक्तं कैयटेन तद्यथा—"पूर्वं सम्बुद्विलोपमाश्रित्यैतदुक्तम्। यदि तु विशेषविहितत्वादसम्बुद्वाविति पूर्वमम् प्रवर्त्तते तदा सम्बुद्विलोपो न स्यात्"॥

२ "न वा नुड्विषये रप्रतिषेधात्। वा। न वैतद्विप्रतिषेधेनापि सिध्यति तिस्रणाम् चतस्रणामिति। कथं तर्हि सिध्यति। नुड्विषये रप्रतिषेधात्। नुड्विषये रप्रतिषेधो वक्तव्यः" एतच्च "स्त्रियां च" (७।१।९९) इति सूत्रे उक्तम् भगवता॥

३ अ। १। पा २। सू ६४॥

४ "ऐयः" इति—। इयर्त्तेलङ् तिप् शप ऋः द्विर्वचनम् "अर्त्तिपिपर्त्योश्च" (७।४।७७) इतीत्वम् "अभ्यासस्यासवर्णे" (६।४।७८) इतीयङ्॥

ततो गुणे ऽपृक्तलोपे ऽडाटाविति भावः । अडागमे रूपान्तरेण तत्तच्छास्त्रनिमित्तविघातात् केनापि कार्य्येणानयोर्न यौगपद्यमिति-भावः ॥ लावस्थायामडिति पक्षेऽपि [१]"बहुलं छन्दस्यमाङ्योगेऽपि" इति बाहुलकात्तथैवमेव प्रक्रिया बोध्या ॥ "अभिनोऽच" इत्यत्रा-पीकारस्लोपापृक्तलोपाभ्यां श्रमो यौगपद्यासंभवेन परत्वाल्लोपे तस्य प्रवृत्तिरिति बोध्यम् ॥ भाष्ये

[२]**प्रयोजनं ङौ** (भा)

इति सूत्रारम्भवादी ॥ प्रत्याख्यानवाद्याह

[३]**भसंज्ञेत्यादि ॥** (भा)

सूत्रारम्भवाद्याह

[४]**भसंज्ञायां तावदिति ॥** (भा)

[५]**यदयं नङीति ।** (भा)

अङ्गाधिकारप्रतिनिर्द्देशपक्षेऽयं ज्ञापकोपन्यासः ॥

अकारेणाऽणन्तमिति । (कै)

तद्धि [६]"जातेरस्त्री"त्यादेरास्त्रुरित्यादौ व्यावृत्तये आवश्यकम् ॥

---

१ अ ६ । पा ४ । सू ७५ ॥

२ प्रयोजनं ङौ नकारस्लोपेलेम्विषयः ॥

३ भसंज्ञाङीप्ष्वगोरात्वेषु च दोषः । वा ॥

४ भसंज्ञायां तावन्न दोषः ॥

५ आचार्य्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन भसंज्ञा भवतीति यदयं "न ङिसंबुद्ध्योः" (८ । २ । ८) इति ङौ प्रतिषेधं शास्ति ॥

६ अ ४ । पा १ । सू ६३ ॥

ननु प्रत्ययग्रहणसामर्थ्येन प्रधानतया प्रत्ययत्वेन प्रत्ययस्य यत्र निमित्तता तत्रैवाऽल्विध्यर्थमिदमेवं चाकाररूपो योऽण् इत्यर्थेऽपि प्रत्ययलक्षणं दुर्वारमत आह

विशेषणेति ॥ (कै)

वस्तुतोऽकार एव विशेष्य इत्याह

अणेति ॥ (कै)

न तु प्रत्ययनिमित्त इति। (कै)

प्राधान्येन प्रत्ययनिमित्त इत्यर्थः॥ अज्झलात्मकयञोऽकारेण सामानाधिकरण्यासंभवादाह

अकारावयवेति। (कै)

बहुव्रीहिः। अस्य विशेषणत्वे इदम्। गुणे लन्याय्यकल्पनेति-न्यायादितिभावः॥ नन्वेवं सति मत्यादिष्वतिप्रसङ्गवारणाय [1]"अजाद्यत" इत्यत्र मुख्यार्थस्योत्तरत्र लक्षणायां वैरूप्यं स्यादतो व्याख्यानान्तरमाह

अथवेति ॥ (कै)

तद्विशेषणमिति। (कै)

अमोऽवयवेऽचीत्यर्थ इति भावः॥ एवं प्रत्याख्यानवाद्युक्तदोषेषु परिहृतेषु प्रत्याख्यानवाद्याह

प्रयोजनान्यपीत्यादि ॥ (भा)

ज्ञापनार्थमिति। (कै)

---

१ अ ४। पा १। सू ४॥

प्रत्ययलक्षणेन भवं नेत्यस्येति शेषः। [१]"न लुमता" [२]"तस्मिन्नित्य"नाश्रित्येदम्॥

अङ्गते तु इति। (कै)

परस्मैपदिविहिताङ्ग्राहचर्य्यात् ग्रासुधातोरेव ग्रहणं तचेति पचे विध्यर्थम्॥ नन्वेवमण्यार्य्यग्रीरित्याद्यसिद्धिरिति चेत्। अचाङ्गः। "ग्रास दद्" इति सामान्यसूत्रं ततो "अङि" अजादौ चेदङ्ग्येवेति नियमार्थमिदमेवं च सूत्रे हल्ग्रहणं माभ्वित्ति मित्रग्रीरित्यादिसिद्धिः। [३]"आग्रासः क्वावि"ति तु अत्र ग्रासोरेव ग्रहणे विध्यर्थम् अन्यथा नियमार्थमिति आग्रास्ते इत्यादौ न दोष इति॥ अथ वार्तिकोक्तविध्यर्थत्वे दूषिते भाष्यकृन्नियमार्थं सूत्रमिति प्रश्नपूर्वकमाह

[४]न तर्हीत्यादि॥ (भा)

प्रत्ययं गृहीत्वेति। (भा)

प्रत्ययं तद्ग्राह्यधर्म्मपुरस्कारेण यदुच्यत इत्यर्थः॥

शब्दं गृहीत्वेति। (भा)

उक्तधर्मातिरिक्तपुरस्कारेण यदुच्यते इत्यर्थः॥ ननु "[५]शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन माभूत्" स्यानिवत्त्वेन तु स्यादत आह

---

१ अ १। पा १। सू ६३॥ २ अ १। पा १। सू ६॥
३ ग्रास इत्त्व आग्रासः क्वौ। वा- ६। ४। ३४॥
४ न तर्हीदानीयमयं योगो वक्तव्यः॥ ५ अत्रैव भाष्ये॥

स्थानिवदिति ॥ (कै)

प्रत्यय एवेति। (कै)

उक्तोऽर्थः। एतदर्थमेव द्वितीयं प्रत्ययपदम्। न च "अलोमोषमो" इति पर्य्युदासेन श्रूयमाणमन्तस्यैव ग्रहणमिति नियमोऽपि व्यर्थ इति वाच्यम्। पर्य्युदासेन प्रत्ययावयवमन्तस्यैव ग्रहणापत्तौ सुब इत्यादौ स्वरानापत्तेरिति भाष्याशयात्॥ ननु स्थानिनिमित्तं यदन्यस्य कार्य्यं तत्स्थानिवत्त्वेन लोपेऽपि न तु तस्यैव ह्रसतो वचनग्रतेनापि कार्य्यित्वाप्रतिपादनादिह चासत एव कार्य्यित्वमत आह

तच्च चेति। (कै)

[1]"सोर्मनसी" इति सूत्रे इत्यर्थः॥

न लुमताङ्गस्य। १। १। ६३॥

लोपक्रियानिरूपिता करणे तृतीया। यद्यपि लुग्ग्रब्द्योगात् संज्ञा लुमद्वाच्या न च तत्रायं प्रतिषेधः किन्तु तत्प्रतिपादिता-

---

१ सोर्मनसी अलोमोषसी। ६। २। ११७॥ लोमोषसी वर्जयित्वा सोः परं मन्नन्तमसन्तंचाद्युदात्तम्॥

दर्शने एवं च [1]"लुमति प्रतिषेध" इत्यनुपपन्नं तथापि वाचकधर्मस्य वाच्य उपचार इत्याह

लुमदिति ॥ (कै)

ननु सर्वोऽपि स्वरः कार्य्यित्वेनैकमेवपदं गृह्णातीत्यत आह

एकेति ॥ (कै)

[2]सर्वामन्त्रितेत्यचामन्त्रितपदेनाष्टमिकमपि गृहीतुं शक्यमिति [3]"पदस्य" [4]"पदाद्" इत्यधिकारेऽनन्तरमप्यामन्त्रितस्येत्युल्लङ्घ्य व्यवहितमुदाहरति

दधीति ॥ (कै)

अङ्गस्येत्यधिकारेति। (कै)

वस्तुतस्तदनिर्देशेऽप्यावश्यकमेतत्। तथाहि सौवरीणां सप्तमीनां

---

१ लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम्। वा॥

२ सर्वामन्त्रिते सर्वामन्त्रितपदेन—। सम्॥ अत्र भाष्यम्। सर्वामन्त्रितसिज्लुक्स्वरवर्जम्। वा। सर्वस्वरम् आमन्त्रितस्वरं सिज्लुक्स्वरं च वर्जयित्वा॥ सर्वस्वर। सर्वस्तोमः। सर्वएष्ठः। "सर्वस्य सुपि" इत्यनेनाद्युदात्तत्वं (६। १। १६१) यथा स्यात्॥ आमन्त्रितस्वर। सर्पिरागच्छ। सप्तागच्छत। "आमन्त्रितस्य च" (६। १। १६८) इत्याद्युदात्तत्वं यथा स्यात्॥ सिज्लुक्स्वर। मा हि दाताम् मा हि धाताम्। "आदिः सिचोऽन्यतरस्याम्" (६। १। १८७) इतेव स्वरो यथा स्यात्॥

३ अ ८। पा १। सू १६॥ ४ अ ८। पा १। सू १७॥

[२]"भीह्रीभृ" इति सूत्रे प्रत्ययात् पूर्वम् इति पूर्वग्रहणेन तदन्त-सप्तमीत्वस्य षाष्ठभाष्ये तत्सूत्रे एवोक्तत्वेन स्वराणां प्रत्यये परतः पूर्वकार्य्यत्वाभावात् कित्स्वरे षष्ठ्या एव सत्त्वाच्च ॥ ननु संज्ञाया-मुपमानम् इति उपमानशब्दः संज्ञायामाद्युदात्त इत्यर्थकं कनो लुपि चंचेव चंचा इत्यादावाद्युदात्तसाधकं [२]"ञ्नित्यादिरि"त्येव सिद्धे व्यर्थं सदनुबन्धलक्षणे स्वरे प्रत्ययलक्षणाभावज्ञापकमिति तत्-सूत्रे भाष्ये स्पष्टं तेनेदं विरुद्धेतेति चेन्न। अत एव तत्र भाष्ये "पथिमथिस्वरार्थं वचनं कर्त्तव्यम्" इत्युक्तम्। एवं च तदर्थस्या-त्यवचनस्य कर्त्तव्यत्वं वदताऽन्येषामकर्त्तव्यत्वमर्थादुक्तमेव। एतेन "भीह्री"तिज्ञापकं विशेषापेक्षं सप्तम्यर्थग्रहणे तदन्तग्रहणे च यत्र फलभेदस्तद्विषयम्। एवं च [३]"उपोत्तमं रिती"त्यादावेव तत्प्रवृत्ति-रिति कैयटाग्रय इति परास्तम्। [४]"संज्ञायामुपमानम्" इति

---

१ भीह्रीभृह्रुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति (६।१।१९२) अथ पूर्वग्रहणं किमर्थं न "तस्मिन्निति निर्दिष्टे पूर्वस्य (१।१।६६) इति पूर्वस्यैव भविष्यति। एवं तर्हि सिद्धे सति यत् पूर्वग्रहणं करोति तज्ज्ञापयत्याचार्यः स्वरविधौ सप्तम्यस्तदन्तसप्तम्यो भवन्तीति। किमेतस्य ज्ञापने प्रयोजनम्। "उपोत्तमं रिति" (६।१।२१७) रिदन्तस्य। "चङन्यतरस्याम्" (६।१।२१८) चङन्तस्य॥ यद्ये-तज्ज्ञाप्यते "चतुरः शसि" (६।१।१६७) इति शसन्तस्यापि प्राप्नोति। शसग्रहणसामर्थ्यान्न भविष्यति। इतरथा हि तत्रैवायं ब्रूयाद् "ऊडिदं पदाद्यप्तृन्भ्यः" (६।१।१७१) चतुर्भ्यश्चेति॥

२ अ ६। पा १। सू १९७॥ ३ अ ६। पा १। सू २१७॥

४ अ ६। पा १। सू २०४॥

सूत्रस्थभाष्यविरोधात् । तस्माज् ज्ञापकस्य सामान्यापेक्षत्वमेवोचितम । तच्च सप्तम्या यथाश्रुतत्वे हि "न लुमते"ति निषेधात्तदप्रवृत्तौ "अनितीति प्रयोजनम्" इति भाष्यासङ्गतिः स्पष्टैव । न चाङ्गाधिकारप्रतिनिर्देशपक्षे तद्भाष्यं सिद्धान्तपक्षे योजयितुं शक्यत्वादितिदिक् ॥ षष्ठीसमासादौ परत्वात् सति शिष्टत्वाच्च समासान्तोदात्तस्यैव प्राप्तेर्भाष्ये "सर्वस्तोम" इति वज्रबीहिरुदाहृतः । तच्च वज्रबीहिस्वरस्य द्विपदाश्रयत्वात् प्रतिषेधस्यैवाप्राप्तेः कथं तदपवादे इदमुदाहरणमत आह

सर्वस्येति ॥ (कै)

विधीयत इति । (कै)

अपवादनिवर्त्तनेन व्यवस्थाप्यत इत्यर्थः ॥

प्रत्ययस्वरेणेति । (कै)

इमिप्रत्ययान्तत्वादितिभावः । नञ्विषयस्य इत्यस्य तु न प्राप्तिः । अनिसन्तस्येतिपर्य्युदासात् । इतादित्वकल्पनं तु किमर्थमितिचिन्त्यम् ॥

नित्स्वरेणेति । (कै)

सप्तन् शब्दोहि [१]"सप्तसृभ्यां तुट्च" इति कनिन्नन्तः । [२]"नः संख्याया" इत्यप्यादुदात्तत्वं प्राप्नोतीति द्रष्टव्यम् । माहि दातामित्यत्राऽट्प्रतिषेधाय माङ् । हि शब्दो [३]"हिच" इति निघातप्रतिषेधार्थः ॥ सिज्लुक्स्वरवर्जनं न कार्य्यमित्याह

---

१ उणादि – १५५ ॥ २ फिट् – सू – २८ ॥
३ अ ८ । पा १ । सू ३४ ॥

लेरिति । (कै)

[१]"गातीं"त्यनेन ङेरेव लुकि [२]"मन्त्रे घसे"त्यत्र पुनर्लिग्रहणं न कार्य्यं जुस्थिधावात इत्येतच्च विध्यर्थं स्यादिति लाघवमिति-भावः ॥

प्रत्ययलक्षणार्थमिति । (कै)

प्रत्ययलक्षणेन भिज्निमित्तकार्य्यार्थमित्यर्थः ॥ ननु "ञ्नि-कित्स्वरा" इति भाष्यदर्शनाज् ञ्निकितां स्वरविशेषणत्वेन लुका समासोऽनुपपन्न इत्यत आह

ञ्नित्कितामिति ॥ (कै)

"प्रयोजयन्ती"त्यस्य कर्माकाङ्क्षायामाह

प्रतिषेधमिति ॥ (कै)

लुबिति । (कै)

वार्त्तिके लुकीत्युपलक्षणमितिभावः ॥ भाष्ये

आद्युदात्तत्वं माभूदिति । (भा)

एवं च प्रातिपदिकादिस्वरेणान्तोदात्तत्वमेवेतिभावः ॥ अचि-शब्दात् [३]"इतस्त्रानिञ" इति ढकोऽ[४]"चिश्नुधि"ति लुक् । ननु "अचय" इत्यत्र कित्त्वप्रयुक्तान्तोदात्तत्वाभावेऽपि प्रातिपदिकस्वरेण तत्त्वं दुर्वारमत आह

---

१ अ २ । पा ४ । सू ७७ ॥ २ अ २ । पा ४ । सू ८० ॥
३ अ ४ । पा १ । सू ११२ ॥ ४ अ २ । पा ४ । सू ६५ ॥

[1]राश्नदीति ॥ (कै)

चिबन्त इति । (कै)

नान्तस्त्वन्तोदात्त इति भावः। इदं प्रयोजनं कित्तद्धितान्तस्यान्त उदात्त इत्यर्थे बोध्यम्। कितः प्रत्ययस्यैवान्तोदात्तत्वे तु प्रत्ययलक्षणेन कार्यिणोऽसम्पादनान्न दोषः। अत एव नखनिर्भिन्न इत्यैस्त्वेत्याङ्गः ॥ पथिमथिभ्यां द्वौ द्वन्प्रत्ययान्ततया प्रत्ययस्वरेण [2]"फिषोऽन्त" इति वाऽन्तोदात्तौ तयोः सर्वनामस्थाननिमित्तमाद्युदात्तमत्रापि स्यादित्यर्थः ॥ भाष्ये

प्रतिषेधो माभूदिति । (भा)

तेनापर्युदासत्वं सूचितं तदुपपादयति ।

पर्य्युदासे तु इति । (कै)

प्रत्ययत्वेन सुप्सादृश्ये तु अहर्दातीत्यत्रापि रत्वं न स्यादित्यर्थः ॥ नन्विष्यमाणमपि न प्राप्नोति प्रत्ययलक्षणनिषेधेन रत्वस्यैव प्राप्तेरत आह

लोपशब्देनेति । (कै)

[3]"हल्ङ्यादि" सूत्रेणेतिभावः। लुमता लुप्त एव निषेध इति तात्पर्य्यम्। "न लुमता तस्मिन्निति" पक्षे तु नेदमावश्यकम्। उत्तरपदत्वे चेति सर्वथा कार्य्यम् ॥ ननु सामान्यत उत्तरस्य पदत्वे इत्यर्थे परमं चर्म इत्यत्रापि निषेधापत्तौ न लोपो न स्यादत आह

---

१ राश्नदिभ्यां क्विप् (उणादि – सू ५०६) अदेस्त्विनिश्च (उणादि – सू ५०७) इति चिबन्तोऽचिशब्द आद्युदात्तः ॥

२ फिट् – सू – १ ॥ ३ अ ६ । पा १ । सू ६८ ॥

उत्तरपदमिति । (कै)

अत एव वञ्चुपूर्वस्य नेति वचनमर्थवदितिभावः ॥ उत्तरपद-शब्दस्य समासचरमावयवे रूढ इत्यसमासे नातिप्रसङ्ग इति बोध्यम् ॥

समासार्थेति । (कै)

तच्च सुप्सुपेत्यधिकारादितिभावः ॥

ताम् । (कै)

[1]"सुपो धात्वि"ति लुप्ताम् ॥

कुत्वादीनि । (कै)

कुत्वघत्वढत्वादीति ॥ ननु भत्वेन पदत्वबाधोऽत आह

यस्मादिति । (कै)

तथाच भिन्नावधित्वान्न बाध्यबाधकभाव इति भावः ॥ भाष्ये

पदस्येतीति । (भा)

पदस्येत्यधिकृत्य यानि विहितानीत्यर्थः ॥ ननु सोपपदात् सिचेर्बिचि दधिषेचौ इति स्यादेव । न चेष्टापत्तिः । पदादादिरिति पक्षे दुर्लभत्वादत आह

अनभिधानादिति । (कै)

तस्य छान्दसत्वादितिभावः ॥ भाष्ये

यद्यपदादीति । (भा)

एकदेशेन संपूर्णं वार्त्तिकमुपलक्ष्यते यतः प्रतिषेधस्यातिव्याप्तिर्न प्रतिषेधापवादस्येति बोध्यम् ॥

---

१ च २ । पा ४ । सू ७१ ॥

स्वरश्चेति । (कै)

उत्तरपदादिरित्यधिकारादितिभावः ॥ नन्वसमासे "स्वाङ्गग्रिटाम्" इति कर्णस्याद्युदात्तत्वं सिद्धमेवेत्यत आह

कर्णशब्दादिति । (कै)

एवमादिविधिर्न सिध्यतीति भाष्यादुत्तरपदादिरित्यधिकारस्य सूत्राणां वैयर्थ्यस्यैव दूषणत्वेन प्रतीतिरित्येके ॥

प्रत्यासत्त्येति । (कै)

[1]"प्रत्ययग्रहणेन यस्मात् न विहितस्तदादेरित्युपस्थित्येति भावः ॥

तथाऽपीति । (कै)

वस्तुतो राजकुमार्यौ इत्यत्राऽपि दोषः ॥ समुदायादसौविहितो नावयवात् । अन्यथा कौरुचरेय इत्यादौ चकाराकारस्याऽपि वृद्धिः स्यात् । "इह तर्हि" त्यादिभाष्यं तु अभ्युपेत्यवादेन । श्रुतेरये तु नोत्तरपदत्वे चेत्यस्य प्रवृत्तिः । अत एव पूर्वत्रैव दोषेणेदं दूषितं भगवतेति बोध्यम् । [2]"ङमो ह्रस्वाद्" इति सूत्रस्थं भाष्यं त्वेकदेशयुक्तिरिति न दोष इति तत्रैव निरूपयिष्यामः ॥ समासचरमावयवे उत्तरपदशब्दो रूढ इत्यभिप्रेत्याह

समासे हीति । (कै)

न तु पदत्वमपि तद्व्यवहारे प्रयोजकमित्यर्थः ॥ केवलरूढत्वे मानमुक्तं तुच्यतु दुर्जनन्यायेन केवलयोगेऽप्याह

---

१ परिभाषेन्दुशे – २३ ॥ २ अ ८। पा ३। सू ३१ ॥

न च कर्णेति । (कै)

राजवाचककर्णशब्दस्य तु "अभिव्यक्तपदार्था ये" इति न्यायान्न तत्र ग्रहणमितिभावः । काश्यपिणौ इत्यादौ [१]"छन्दोब्राह्मणानी"ति तद्विषयताबोधकशास्त्रबलात् सुबुत्पत्तेः प्रागेव तद्धित इति न दोषः । भाष्ये [२]"नः क्ये" इत्यादि "सुबन्तं च" इति॥ [३]"यस्मात् प्रत्ययविधिः" इति अवश्यमुत्तरचानुवर्त्त्यम्परमैश्चतुर्भिरित्यादौ परमघटितसमुदायस्य पदत्ववारणाय । तत्त्वे हि [४]"झल्युपोत्तमम्" इति परमैरित्यस्यापि निघातापत्तिः । एवं च तस्य [५]"नः क्ये" इत्यत्रापि सम्बन्धे यस्मात् क्यविधिस्तदादि यदि क्ये तन्निमित्तान्तर्वर्त्तिसुपा पदं तदा नान्तमेवेति नियमः स्यात् तथाच परमवाच्यतीत्यादावयववाक्यशब्दस्य पदत्वेन कुत्वं स्यात् सूत्रस्तु समिध्यतीत्येतद्व्यावृत्त्यर्थं स्यादिति सुबन्तमित्यपि सम्बध्यत इति भावः । तस्य च मध्ये चेत् सुबन्तं तदा तदपि नान्तमेव पदमित्यर्थः । अन्वाचयशिष्टं च सुबन्तमिति सर्वत्र सन्निपातशिष्टत्वे "षड्भ्य" इत्याद्यसिद्धिः । [६]"भिति च" इत्यत्र यद्यपि नास्ति उपयोगोऽवयवसुबन्ताऽप्रसिद्धेस्तथाऽपि उत्तरचानुवृत्तिं दर्शयितुं तत्राऽपि तत्सम्बन्धो दर्शितः । व्यपदेशिवद्भावेन कथं चिदन्वयः सम्पाद्यः । एवं [७]"स्वादिष्वि"ति सूत्रेऽपि तदनुवृत्तिकरणमुत्तरार्थमेव ।

---

१ अ ४ । पा २ । सू ६६ ॥ २ अ १ । पा ४ । सू १५ ॥
३ अ १ । पा ४ । सू २३ ॥ ४ अ ६ । पा १ । सू १०० ॥
५ अ १ । पा ४ । सू १५ ॥ ६ अ १ । पा ४ । सू १६ ॥
७ अ १ । पा ४ । सू १७ ॥

[१]"यचि भम्" इत्यत्रापि पदसंज्ञया तुल्यावधिकत्वसिद्ध्यर्थं यस्मादित्यनुवर्त्यमिति बोध्यम् ॥

संज्ञिनां भेदादिति । (कै)

यति सौ तदन्तस्य सुबन्तमिति पदत्वं न तत्प्राग्भागस्य [२]"स्वादिष्वि"तीति भावः ॥ नन्वपरनिमित्तकत्वेनान्तरङ्गतया सुबन्तमिति पदत्वं स्यादत आह भाष्ये

प्रतिषेधाश्चेति । (भा)

विधुमूलनं प्राप्तविधेर्निवर्त्तनम् । एवं चापवादन्यायेनाचान्तरङ्गासम्भव इति भावः । अचानुवर्त्तमानं सुबन्तमित्यपि [२]"स्वादिष्वि"-ति सूत्रेण तदनुवृत्त्या मध्यस्य सुबन्तस्य यत्प्राप्तं तन्निषेधकं न तु सुबन्तमिति सूत्रप्राप्तस्येति बोध्यम् ॥ भाष्ये

नोत्सहते इति । (भा)

स्वयमप्रवर्त्तमाना कथमन्यं बाधेतेति भावः ॥ ननु "सर्वनामस्थानेऽचची"ति न्यासस्य पदत्वनिषेधकत्वेऽनन्तरस्येति न्यायेन "स्वादिष्वि" त्यस्यैव निषेधे परमवाचावित्यादौ सुबन्तमिति पदत्वं स्यादत आह

योगविभागे इति । (कै)

एवं च तत्सामर्थ्यादनन्तरस्येति न्यायबाध इति भावः ॥ "यची" त्यस्य पुरस्तादपकर्षे फलमाह

१—२ अ १ । पा ४ । सू १८ ॥

हलादाविति ॥ (कै)

वस्तुमाचम् । (कै)

अर्थसिद्धोऽर्थः । तत्फलं नञः सर्वनामस्थानपदेनासम्बन्ध-प्रदर्शनम् ॥ भाष्ये

प्लुतविकारे इति । (भा)

प्लुतसहितविकारे इत्यर्थः । एचोऽप्रगृह्यादूराद्भूते पूर्वस्यार्द्ध-स्यादुत्तरस्येदुतावित्यत्रेतिभावः ॥ भाष्य

इह तर्हीति । (भा)

वार्त्तिकारम्भे त्वपदादिविधावित्युक्तेर्न दोषः । प्रत्याख्याने तु दोषः कुत्वाभावाय पदत्वनिषेधप्रवृत्तेरावश्यकत्वात् । एतेन योग-विभागसिद्धस्य क्वाचित्कत्वान्न दोष इत्यपास्तमितिभावः ॥

पञ्चमीतियोगविभागादिति । (कै)

पदादित्यस्य परशब्दान्वयेनाऽसामर्थ्यादत्र समासग्रास्त्राप्राप्तेः सौत्रः समास इति वक्तुमुचितम् ॥ भाष्ये

न तेभ्यः प्रतिषेध इति । (भा)

तेभ्यः परस्य सुबन्तं पदमितिपदत्वमाश्रित्यापि न प्रतिषेधः । अत एव परभवाच्च इत्यादावपि न दोषः ॥ भाष्ये

[1]पदादेर्नेत्युच्यमानेऽपीति । (भा)

षष्ठीतत्पुरुषेऽपि न सिध्यति कुत्वाऽभावाय पदत्वाऽभावस्या-

---

१ पदादादेर्नेत्युच्यमानेऽपीति । क । ख । ग । ङ ॥

वश्यकत्वादिति अपेरर्थः । अयं बह्वसेचि दोषो वार्त्तिकारम्भेऽपि उत्तरपदत्वाभावेन निषेधाप्राप्त्या पदत्वसत्त्वेन षष्ठीतत्पुरुषेण षत्वनिषेधमाश्राज्येऽपि कुत्वप्राप्तेः ॥ इदानीं प्रत्याख्यानप्रकारस्य गौरवदुर्ज्ञेयत्वाभ्यामयुक्तत्वं मनसि निधाय लाघवाय नञ्रहितवचनपाठमाह

एवं तर्हीति ॥ (भा)

न पदान्तविधाविति । (भा)

यदान्तस्यानिकविधावित्यर्थः । नञ्घटितवार्त्तिकस्याप्यत्रैव प्रवृत्तिर्व्याख्यानादेतदेकफलत्वायेति बोध्यम् ॥ एतावतापि बह्वसेचौ इत्यस्यासिद्धिरिति शङ्कते

कथं बहुसेचाविति ॥ (भा)

तदुपपादयति

समासेति । (कै)

एवं च नियमाप्राप्तौ प्रत्ययलक्षणेन पदत्वात् षत्वनिषेधवच्[१] "चोः कुः" पदान्तस्येति कुत्वं स्यादितिभावः ॥ पञ्चमीसमासेऽपि षत्वापत्तिरित्याह

नापि पूर्वस्येति ॥ (कै)

भाष्ये

बहुच्पूर्वस्यचेति । (भा)

आद्यवार्त्तिकारम्भे तत्प्रत्याख्याने च[२] "सात्पदाद्योः" इत्यचेदं

---

१ अ ८। पा २। सू ३०॥ २ अ ८। पा ३। सू १११॥

कार्य्यमितिगूढ़ आशयः। न पदान्तविधौ इति प्रतिनिर्देशादुत्तरपदत्वे चेत्यस्य वार्त्तिकस्य ङमुडादिविधौ णत्वादिविधौ चावृत्तिरिति बोध्यम्। [१]"ङमुट्" सूत्रस्थं भाष्यं तु एतद्विरोधाद् [२]"उञि च पदे" इति सूत्रस्थभाष्यविरोधाच्च नलोपादिप्रत्यन्त इति वार्त्तिकस्थभाष्यविरोधाच्चैकदेशयुक्तिरिति बोध्यम्। एवं च प्रत्याख्यानप्रकारोऽपि योगविभागस्य क्वाचित्कत्वेन ङमुडादिविषये न। इदमेव ध्वनयितुं प्रत्याख्यातमपि वार्त्तिकं पुनरक्षरान्तरैरुपात्तमित्याहुः॥

मुख्येत्विति। (कै)

उत्तरपदशब्दस्य समासचरमावयवे रूढ़ेरिति भावः। रूढ्यैव ग्रहणमित्येतदाख्यायकं [३]"द्वन्द्वे चेति" इति तत्त्वम्। प्रत्याख्यानेऽपि न मध्यमस्य प्राप्तिः। मध्यमुबन्तस्याऽपि स्वादिपरत्वेन विशेषणादिति बोध्यम्॥

प्रस्तावादिति। (कै)

आत इत्यारम्भादित्यर्थः॥

सिच इति। (कै)

अनेन विधिलाभसम्भवो दर्शितः॥ भाष्ये

श्रूयमाणेति। (भा)

श्रूयमाणत्वार्थकं विभक्तिविशेषणमित्यर्थः॥ तल्लाभोपायं दर्शयति

---

१ अ ८। पा ३। सू ३२॥ २ अ ८। पा ३। सू २१॥
३ अ १। पा १। सू ३१॥

षष्ठीत्यादि ॥ (कै)

अथवा यथा रथेति । (कै)

स्थग्रब्दः साहित्यवाचीतिभावः ॥

तदवयवमिति । (कै)

बहुव्रीहिः । युष्मदस्मदोरिति तद्घटितसमुदाये लाक्षणिकमिति भावः ॥ मुख्येऽर्थे एव पदसामानाधिकरण्ये सम्भवति किं लक्षणयेत्याह

अच हीति । (कै)

यद्यपि द्वितीयायां षष्ठ्यां च तयोः पदत्वासम्भवेन तत्र लक्षणाया आवश्यकत्वेनान्यत्राप्येकरूपत्वाय लक्षणा युक्ता तथापि पदस्य टित्वस्य [1]"मादुपधाया" दित्यादाववयवषष्ठीत्वस्य क्लृप्ततया पदावयवयोरित्यर्थ एव स्यादत ईदृग्लक्षणालाभः सर्वग्रहणसाध्य एवेत्याह

सर्वग्रहणमिति । (कै)

[2]"अनुदात्तं सर्वम्" दित्यतः ॥ ननु लावस्थायामेवान्तरङ्गानपीतिन्यायेन लुकि प्रत्ययलक्षणेनाऽपि न तिङन्तत्वमत आह

परत्वादिति ॥ (कै)

नाप्राप्तेष्टिति । (कै)

अन्तरङ्गानपीतिन्यायादित्यपि बोध्यम् ॥ "इट्प्रतिषेधः" दित्यत्र "न प्राप्नोती" त्यनुषङ्गः ॥

दीर्घत्वम् । (भा)

---

१ अ ८। पा २। सू ६ ॥ २ अ ८। पा १। सू १८ ॥

[1]"क्रमः परस्मैपदेषु" इति ॥

समुच्चिनुयादिति । (कै)

तच्चासम्भवीतिशेषः ॥

इत्यभिप्रायेणेति । (कै)

प्रश्न इत्यर्थः ॥ भाष्ये तटस्थोऽभिप्रायानभिज्ञ उत्तरयति

इटश्चेति ॥ (भा)

आचार्य्य आह

नेत्याहेति । (भा)

गमेरिड्विधिर्वृतेस्तत्प्रतिषेधः क्रमेश्च दीर्घत्वं न सिध्यतीत्यर्थः इति भावः ॥ अनन्तरोक्तातिव्याप्तेरुपक्रमोक्ताव्याप्तेश्चाङ्गाधिकारपरत्वं न युज्यते इत्युपसंहरति भाष्ये

इहेति ॥ (भा)

ऋनित्कित्स्वरा इति । (कै)

इदमुपलक्षणम् । अहर्दादातीत्यत्रासुपीति प्रतिषेधस्यापि । वस्तुतः "किञ्चित्च" इत्यत्र किञ्चित् पदेन [2]"रोऽसुपी"त्येव ऋनित्स्वरविषये सौवरीणां सप्तमीनां तदन्तसप्तमीत्वेन "न लुमता तस्मिन्निति" न्यासेऽपि वचनस्यावश्यकत्वादिति बोध्यम् ॥

तस्मिन् कार्य्यमिति । (कै)

तस्मिन् परतस्तन्निमित्तकं तत्प्रकृतिभूतस्य यत्कार्य्यमित्यर्थः ॥ "कित" इत्युदाहरणभूतात्वय इत्यस्योभयपदेऽप्यभिद्धेस्तत्परिहरति

---

१ अ ७। पा ३। सू ७६ ॥ २ अ ८। पा २। सू ६६ ॥

अचय इत्यचेति ॥ (कै)

यदन्यस्येति । (कै)

प्रत्ययजमित्येव सिद्धे लक्षणग्रहणसामर्थ्येन प्रत्ययनिमित्तकमेव न तु प्रत्ययस्थानिकमित्यर्थादिति भावः॥ युक्त्यन्तरमप्याह

न हीति । (कै)

षष्ठ्यर्थस्योच्चारणरूपप्रसङ्गस्य वक्तुमशक्यत्वादिति भावः। अत एव नखनिर्भिन्न इत्यादावैसादिकं न। एवमसतः सत्तापि न वचनेन शक्येति बोध्यम् ॥ परस्मैपदपरसादेरङ्गत्वनिमित्तस्येडित्याद्यर्थं न दोष इत्याह

विशेषण एवेति । (कै)

एवं च लुप्तप्रत्ययनिमित्तकं तत्प्रकृतेस्तन्न कार्य्यमिति भावः॥ ननु आर्द्धधातुक इत्यादीनां विषयसप्तमीत्वात् पूर्वमेव तेषां प्रवृत्तेर्न प्रत्ययलक्षणापेक्षेत्यत आह

लुकेति । (कै)

एवं च विषयलक्षानायावश्यं प्रत्ययलक्षणमाश्रयणीयं तच्च "न लुमता तस्मिन्निति" न्यासे न प्राप्नोतीति भावः॥

लुङ्परे चिणीति । (कै)

लुङ्परार्द्धधातुकविषये इत्यर्थ इति भावः॥ भाष्ये

तच्चापीति । (भा)

न लुमता तस्मिन्नित्येतदित्यर्थः॥

लुप्ते प्रत्यये यदङ्गमिति । (कै)

लुप्तप्रत्ययनिरूपिताङ्गसंज्ञकस्य यत्कार्य्यमित्यर्थः। उत्काम इत्यादौ तु परस्मैपदनिमित्ताङ्गसंज्ञकस्य न कार्य्यं किन्तु श्नुवादि-निमित्ताङ्गसंज्ञकस्येति न दोषः। किं च परस्मैपदग्रहणस्य तङानाभावोपलक्षणत्वादपि न दोषः। अगायीत्यादौ तु न दोषः। लुङ्निमित्ताङ्गत्ववतश्चिण्वतस्य कार्य्याभावादिति बोध्यम्॥ भाष्ये

एवमपीति। (भा)

आङ्गाधिकारप्रतिनिर्देशाभावेऽपीत्यर्थः॥

[1]वचनं कर्त्तव्यमिति। (कै)

सौवर्य्यः सप्तम्यस्तदन्तसप्तम्य इत्येतत्॥

अलोऽन्त्यात्पूर्व उपधा। १। १। ६५॥

असन्देहार्थमिति। (कै)

अन्त्यात्पूर्वोऽलित्येव वदेदिति भावः॥ अल्ग्रहणमन्त्यनिर्देश इत्यनयोः सामानाधिकरण्यमनुपपन्नमत आह

अभिधीयतेऽनेनेति। (कै)

अल्ग्रहणमन्त्यप्रत्यायकं चेदित्यर्थः। "घञपः पुंसी"ति निर्देशग्रब्दस्य पुंस्त्वम्॥ प्राग्निपूर्वकत्वात्प्रतिषेधस्य प्राग्निमाह

---

१ सर्वग्रब्दार्थं वचनं कर्त्तव्यमिति॥

पूर्वस्येति॥ (कै)

एकाजिति। (कै)

यद्यप्यत्र समुदायसंज्ञया नावयवानामनुग्रहस्तथापि कदाचिद्-विग्रहेषात् सङ्घातस्यापि स्यादित्यनिष्टमाशापादने भाष्यतात्पर्य्यमिति बोध्यम्॥ ननु संज्ञिवदवधिरपि कस्माज्जातिग्रहणप्राप्तः समुदायो न निषिध्यतेऽत आह

अन्त्येति॥ (कै)

संख्या विवक्ष्यत इति। (कै)

ज्ञापकसिद्धस्याऽसार्वत्रिकत्वादनेका व्यक्तिर्न गृह्यत इति भावः॥ संख्याविवक्षा तूद्देश्यगतत्वादयुक्ता॥

पिबेरदन्तत्वेति। (कै)

अल्समुदायस्य लघुत्वाभावादिति भावः। सूत्रम् उखादौ चरितार्थं कदाचिदिकारस्याणुपधात्वेन चिन्त्यमिदम्॥

शब्दस्य हीति। (कै)

एकाज्धातुविषयमिदम्। अनेकाचु प्रथमस्यैकाचो द्वित्वेनार्थ-वत्त्वग्रङ्क्वेव नेति बोध्यम्। एवं चोत्तरखण्ड एवार्थवानिति भावः॥

[1]अव्यक्तानुकरणस्येति। (भा)

अच्छब्दान्तस्याव्यक्तानुकरणस्येत्यर्थे सम्पूर्णस्याच्छब्दस्य पररूपा-नापत्तिरित्यतो वैयधिकरण्यमुक्तम्। अव्यक्तानुकरणं योऽच्छब्द इति तु नार्थः॥ एकाचो नेति निषेधारम्भादित्यलम्॥ ननु विकल्पार्थं तदावश्यकमत आह

---

१ अ ६। पा १ सू ६८॥

[1]नाम्रेडितस्येति। (भा)

अन्त्यस्य पूर्वेण नित्ये परस्मिन्प्राप्ते इति शेषः॥

भेदेन निर्दिष्टौ इति। (कै)

यद्यप्येकदेशविकृतन्यायादौ लोपोऽपि विकारपदेनोच्यते तथापि व्याख्यानादेवाचेदृग्यार्थावगतिरिति बोध्यम्॥ ननु लोपग्रहणाभावे [2]"घ्वसोरेद्धावभ्यासस्य" इत्युक्ते चकाराभावादन्यवचनाच्च प्रकृताभ्यासे एत्वमेवस्यादत आह

तच्च घ्वसोरित्यादि॥ (कै)

ननु चेनानुवृत्तावपि लोपोऽभ्यासस्यैवेत्यत्र नियामकाभावात् पर्य्यायेण त्रयाणामप्येत्वलोपौस्यातामत आह

तच्च व्याख्यानादिति। (कै)

आगन्नूनामन्ते निवेशनाभ्यासस्य लोपसंनिहितत्वादिति भावः॥ नन्वभ्यासपदोत्तरश्चकारः स्यान्यन्तरमेव समुच्चिनुयाद् न विधेयान्तरमिति एत्वमभ्यासस्यापि स्यादतः परिहारान्तरमाह

योगविभागो वेति॥ (कै)

तचेति। (कै)

नत्वेत्वमित्यर्थः। योगविभागसामर्थ्यादितिभावः॥

सर्वापहारेति। (कै)

लोप एव नावशेषः कस्यचिदित्यर्थादितिभावः॥ ननु लोपग्र-

---

१ अ ६। पा १। सू ६६॥ २ अ ६। पा ४। सू ११९॥

(अलोऽन्त्यात्पूर्व उपधा । १। १। ६५ ।) (अ. १। पा. १। आ. ६)

ग्रब्दस्य संज्ञात्वेनाऽऽनर्थक्यात्सुरेव न स्याद् उत्पत्तौ वा हल्ङ्यादि-लोपाद् द्विग्रकारक इत्यनुपपन्नमत आह

लोपग्रब्दादिति । (कै)

पदस्य संयोगान्तत्वाभावादसंदेहाय च [१]"झलां जग्" इत्यत्र जग्त्ववत् संयोगान्तलोपसंयोगादिलोपौ नेति बोध्यम् ॥

इत्संज्ञेति । (कै)

धातुप्रातिपदिकप्रत्ययनिपातागमादेग्रानां [२]"हलन्त्यम्" इतीत्-संज्ञायामपि न दोषः । ग्रस्य स्वरूपेणार्थवत्तया प्रातिपदिकत्वात् कुण्डिनच इव । उपदेग्र इति तु तत्र नानुवर्त्तते इति तत्र भाष्ये स्पष्टम् ॥

उपदेग्र एवेति । (कै)

अन्तरङ्गत्वादितिभावः । एतेन लोपविधानकाले ग्रित्त्वाभावात् कथं सर्वादेग्र इत्यपास्तम् ॥

कार्य्यन्विति । (कै)

[३]"अनेकाल् ग्रित्" इत्यादौ समीपे ऽवयवत्वारोपेण न दोष इति भावः ॥ [४]"एकान्ता अनुबन्धा" इति मुख्यपक्षे तु आद्यमेव समाधानमिति बोध्यम् ॥ भाष्ये

अन्यथा व्याख्यायत इति । (भा)

न तु तत्प्रत्याख्याय तत्स्थाने वचनान्तरं पठितमिति भ्रमितव्यमितिभावः ॥

---

१ अ ८। पा ४। सू ५३ ॥ २ अ १। पा ३। सू ३ ॥

३ अ १। पा १। सू ५५ ॥ ४ परिभाषेन्दु — ५ ॥

इत्यन्त्यस्येति। (भा)

एवं च तेन दलोपे आभ्यामित्यसिद्धिरितिभावः॥ ननु मस्यानिकत्यदाद्यत्वेन व्यवधानान्नाऽनो हलादिविभक्तिपरतेत्यत आह

येननेति। (कै)

आप्परत्वेनेदमो विशेषणाच्चेत्यपि बोध्यम्। इदमिदो लोप इत्यर्थेऽप्यावश्यकम्। एवं च नलोपे द्वयोरकारयोः पररूपे [1]"सुपि चे"ति दीर्घे सिद्धमाभ्यामिति॥

अच ग्रहणादिति। (कै)

अच शब्देन पुनः सनः परामर्शात् सनि योऽभ्यासस्तेनाक्रान्तस्तस्य सर्वस्य लोप इत्यर्थ इति भावः॥ भाष्ये

विषयमपेक्षिष्यामह इति। (भा)

यत्र मुचोऽकर्मकस्य गुणस्तत्राऽभ्यासस्य लोप इत्यर्थः। अकर्मकग्रहणमात्रानुवृत्तौ तु मुमुचते वत्सः स्वयमेवेत्यत्रापि स्यादिति भावः। [2]"विभाषा भवद्" इति वार्त्तिकेऽपि वस्येत्येव सिद्धेऽवस्येत्युच्चारणसामर्थ्याद् [3]"अलोन्त्यस्य" इति न प्रवर्त्तते इति प्रत्याख्याता परिभाषा॥ एवं च [4]"अन्यविज्ञानात् सिद्धम्" इत्यस्य स्थितत्वाद्वार्त्तिके वाशब्दप्रयोगस्तदाह

अथवा व्यक्तमेवेति॥ (भा)

---

१ अ ७। पा ३। सू १०२॥ २ विभाषा भवद्भगवदघवतामोचावस्य॥
३ अ १। पा १। सू ५२॥ ४ अत्रैव भाष्ये॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।) (अ. १। पा. १। आ. ६)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

एतच्चेति । (कै)

अवधिनाऽवधिमतो निर्णयं ब्रूवतेत्यर्थः॥ संयोगोपधेत्यादिव्यवहारस्तु गौणा इति भावः॥

षष्ठीप्रथमयोरपीति । (कै)

दृष्टान्ते "अमीषां ब्राह्मणानाम्" इत्युपादत्ता भगवता सूचितमिदम्॥

उक्तान्न्यायादिति । (कै)

भाष्योक्तादित्यर्थः॥

जातौ बहुवचनमिति । (कै)

भाष्यकृता[1] "जात्याख्यायाम्" इति सूत्रप्रत्याख्यानादिदं चिन्त्यम्॥

तस्मिन्निति निर्दिष्टे पूर्वस्य। १। १। ६६॥

तस्मादित्युत्तरस्य। १। १। ६७॥

स्वरूपपदार्थकत्वेनेति । (कै)

स्वरूपस्य तत्र विशेष्यत्वादिति भावः॥

---

१ अ १। पा २। सू ५८॥

(अ. १। पा. १। आ. ९) (तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

प्रश्न इति । (कै)

[1]"तस्मिन्नणि च" इत्यत्रैवोतान्यत्रापीति प्रश्न इति भावः ॥

तत्रैव पूर्वेति । (कै)

ननु [2]"तस्मान्नुडचि" [3]"तस्मान्नुड्द्विहलः" [4]"तस्माच्छ्रसः" इति सूत्रत्रये उत्तरग्रहणे विपरीतं गौरवमिति चेन्न । यतो द्विहलो नुड्विधायके नास्योपयोगः । तत्राङ्गाधिकारेण लिखिमित्ताङ्गसम्बन्धिदीर्घात् पूर्वस्य प्रत्यासत्त्या तदङ्गसम्बन्धिनोऽसम्भवेन फलाभावात् । एवं "तस्मान्नुडची"त्यत्रापि न दोषः । उत्तरपदाधिकारेण प्रत्यासत्त्या नञ्रूपपूर्वपदनिरूपितोत्तरपदस्यैव तेन नुड्विधानादिति भावः ॥

तस्मिन्निति । (कै)

परामृष्टखञ्यवधानाय सम्बध्यन्तमुदाहरति ।

यौष्माकीणेति ॥ (कै)

षकारस्येति । (कै)

"तस्माद्" इत्येतत् साहचर्य्या"च्छस" इति पञ्चमी ग्रसा च सामानाधिकरण्यं ग्रसवयवे लक्षणयैवेति भावः ॥ मुख्यार्थे सामानाधिकरण्यात् सम्भवात् स्वान्याकाङ्क्षासत्त्वाच्च अवयवषष्ठीत्याशङ्कते

---

१ अ ४ । पा ३ । सू २ ॥ २ अ ६ । पा ३ । सू ७४ ॥
३ अ ७ । पा ४ । सू ७१ ॥ ४ अ ६ । पा १ । सू १०२ ॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।) (अ. १। पा. १। आ. ६)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

अथेति । (कै)

[1]"ग्रस इति स्थानषष्ठीत्य" पाठः । "इति षष्ठी"त्येव पाठः ॥

[2]"आन्" इत्यग्रब्दस्य ग्रभि रूपम् ॥

इति करणादिति । (कै)

लोकेऽर्थप्रधानस्य पदार्थविपर्य्यासकेतिना ग्रब्दप्रधानत्वदर्ग्रना-दितिभावः ॥ नन्वेकार्थप्रत्ययद्वयोपादानं व्यर्थमत आह

थालेति । (कै)

एवं च ग्रब्देनेत्यनेन सामानाधिकरण्यानुपपत्तिर्जातीयस्तु तद्वति स्वभावादितिभावः ॥ नन्वेवं जातीय एव प्रयुज्यतां किं थालेत्यत आह

लौकिके इति । (कै)

उभयोः प्रकारवद्वृत्तित्वेऽप्येवं वक्तुं ग्रक्यमिति उक्तयत्नो वृथा । अत एव कस्य प्रयोग इति चिन्त्यम् ॥ ननु दूषितस्यैव कथमुदा-हरणत्वेन दानमत आह

सिद्धान्तेति ॥ (कै)

अर्थनिर्देशार्थ एवेति । (कै)

अन्यथा तस्मिन्निति ग्रब्देऽव्यवहिते इत्यर्थः स्यादितिभावः ॥

नैतदनुकरणमिति । (कै)

प्रागुक्तयुक्तेरितिभावः ॥

---

१ अत्रैव कैयटे ॥ २ आनुपलभत इत्यादौ ॥

(अ. १। पा. १। आ. ६) (तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

[1]सर्वनाम्नेति । (कै)

सप्तम्यन्तार्थकसर्वनाम्नेत्यर्थः । सप्तमी त्वस्य सप्तम्यन्तार्थकत्वबोधनायानुवादिकेति भावः ॥ इति शब्दलभ्यमर्थमाह

यच्च सप्तम्यर्थेति । (कै)

सप्तम्यर्थबोध इत्याद्यर्थः । अत एव [2]"तस्मान्नुडची"त्यादौ न प्रवृत्तिः । अचीत्यस्य षष्ठ्यर्थत्वादितिभावः । सप्तमीपञ्चम्यर्थावधिकरणावधी । अयं पदोपस्थितिपक्षेऽर्थो दर्शितः पक्षान्तरेऽपि सप्तम्यन्तार्थेऽव्यवहिते सतीत्यर्थो बोध्यः ॥ भाष्ये

[3]सामान्यवाचीति । (भा)

बुद्धिस्थत्वेनैव तदादीनां बोधकतेति भावः । सामान्यमनिर्द्धारित

---

१ सर्वनाम्नाऽयं निर्देशः क्रियते ॥ २ अ ६ । पा ३ । सू ७४ ॥

३ सर्वनाम च सामान्यवाची । तच्च सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति । किं पुनः सामान्यं को* वा विशेषः । गौः सामान्यं कृष्णो विशेषः । न तर्हीदानीं कृष्णः सामान्यं भवति गौर्विशेषो भवति । भवति च । यदि तर्हि सामान्यमपि विशेषो विशेषोऽपि सामान्यं सामान्यविशेषौ न प्रकल्प्येते । प्रकल्प्येते च । कथम् । विवक्षातः । यदास्य गौः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन तदा गौः सामान्यं कृष्णो विशेषः । यदा कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन विवक्षितस्तदा कृष्णः सामान्यं गौर्विशेषः ॥

---

* "वा" इति नास्ति सम्पुस्तके ॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।) (अ. १। पा. १। आ. ६)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

विशेषम् । [१]"तस्मिन्नणि च" इत्यादेरपि सप्तमी पञ्चमीविशेषत्वादित्याशयः ॥

सामान्यस्य । (कै)

उक्तबुद्धिस्थत्वस्य ॥

सर्वविशेषेषु भावात् । (कै)

सत्त्वादित्यर्थः ॥ उक्तमर्थमजानानस्य चोद्यमित्यभिप्रायेणाह

सामान्येति । (कै)

"तस्मिन्निती"त्यस्य [२]"तस्मिन्नणि च" इत्यादिः कथं विशेषस्तस्यापि खञादिनिरूपित सामान्यत्वादिति अचि इत्यस्याप्यकाराद्यपेक्षया सामान्यत्वादिति च प्रश्न इत्यपि बोध्यम् ॥ ननु कथमनवस्थितिः पूर्वावगतं सामान्यं पश्चादवगतो विशेष इति व्यवस्थासम्भवादाह

कदाचिदिति । (कै)

परिच्छेद्यपरिच्छेदकभावोऽनियत इत्यर्थः । एवं प्रकृतेऽप्यचीत्यादीनां बुद्धिस्थत्वेन परिच्छेदाद् बुद्धिस्थस्यापि तैः परिच्छेदादनिर्णय इति भावः ॥

विशेष्यं प्रधानमिति । (कै)

परिच्छेद्यमित्यर्थः ॥

१-२ अ ४ । पा ३ । सू २ ॥

(अ. १। पा. १। आ. ९) (तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

परोपकारितया । (कै)

परिच्छेदकत्वेन ॥ एवं प्रकृतेऽपि तस्मिन्नित्यर्थस्य परिच्छेद्यत्वेन विवक्षणात् सामान्यत्वमचीत्यादीनां परिच्छेदकत्वविवक्षणाद्विशेषत्वमितिभावस्तदाह

इहापीति । (कै)

अयं भावः। सप्तम्यन्तार्थे इत्युक्ते कस्मिन्नित्याकाङ्क्षोदयादचीत्याद्यर्थस्य परिच्छेदकत्वाद्विशेषत्वमेवेति ॥ तदेवं पर्य्यायेण सामान्यविशेषभावमुपपाद्य द्वितीयविधया कृतं प्रश्नं समाधातुं यौगपद्येनापि तमुपपादयितुमाह भाष्ये

[1]पितेत्यादि । (भा)

यथा "पराशरात्मजं वन्दे शुकतातं तपो निधिम्" इत्यत्र तथा राजपुरुषाश्व इत्यत्र पुरुषो राजापेक्षया विशेष्यः अश्वापेक्षया विशेषणम्। एवं प्रकृते खञादिनिरूपितसामान्यस्यापि "तस्मिन्नणि च" इत्यस्य "तस्मिन्नित्ये"तत्प्रतिविशेषत्वमिति भावः ॥

इत्याहेति । (कै)

इत्यत आह इत्यर्थः ॥

निर्देशप्रयोजनानामिति । (कै)

---

१ अपर आह प्रकल्प्येते च। कथम्। पितापुत्रवत्। तद्यथा। स एव कं चित् प्रति पिता भवति कं चित् प्रति पुत्रो भवति। एवमिहापि स एव कं चित् प्रति सामान्यं कं चित् प्रति विशेषः ॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।) (अ. १। पा. १। आ. ६)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

बोधप्रयोजनकानां शब्दानां मध्ये इत्यर्थः ॥ [1]द्विवचनविभ-ज्योपपदत्वाभावादाह

भाष्यकारेति । (कै)

परेतु नैर्देशिकानां मध्येऽन्येभ्यः शब्देभ्यः इत्यध्याहृत्य विभ-ज्योपपदे तरप् । अत एव "न खल्वपि बहूनां प्रकर्षे तरपा भवितव्यमि"ति तत्सूत्रस्थभाष्येणाविरोध इत्याहुः ॥

सप्तमीशब्देनेति । (कै)

तथा च "[2]सप्तम्यां जनेर्ड" इत्यादावेवेदमुपतिष्ठेतेति भावः । किं च यत्र सप्तम्यन्तनिर्देश इत्यर्थे "[3]नेड्वशि कृति" इत्यादौ दोषः । तत्र "कृती"ति सप्तमीनिर्देशसत्त्वात् परन्तु षष्ठ्यर्थे स इति भावः । सप्तमीनिर्दिष्ट इति सूत्रकरणेऽपि तदर्थं ङ्यादिनिर्देश इत्यर्थे स एव दोषः । यथाश्रुतमेव कस्मान्न गृह्यते इत्यत आह

न पुनरिति । (कै)

अत एव किमर्थमुपसर्गनिर्देशो न दिष्ट इत्येवोच्चेतेति नोक्तम् ॥

अन्तरेणापीति । (कै)

साकाङ्क्षतयोच्चारिते इति पदाध्याहारादिति भावः ॥

---

१ अ ५। पा ३। सू ५७ ॥ २ अ ३। पा २। सू ६७ ॥
३ अ ७। पा २। सू ८ ॥

पुनर्निर्दिष्टेति। (कै)

एवं च सप्तम्यन्तार्थे बहिर्भूते उपश्लिष्टस्य पूर्वस्येत्यर्थः। बहिर्भावस्य चावध्यपेक्षत्वाद्वधेश्च सूत्रोपात्तस्यैव ग्रहीतुमुचितत्वेन तस्य च शब्दात्मकत्वादवधिमानपि शब्द एवेति शब्दे सप्तमीनिर्दिष्टे पूर्वस्येति लभ्यते इति भावः॥ ननु प्रत्ययस्यार्थेन पौर्वापर्य्यासम्भवात् कथं जनपदे इत्यत्रास्योपस्थानमत आह

तत्रायमर्थः स्यादिति। (कै)

लक्षणा स्यादिति भावः॥

अर्थेन पौर्वेति। (कै)

तद्वाचकशब्दलक्षणायां च न मानमिति भावः। अत्रार्थनिर्देशे च व्याख्यानमेव शरणम्। एवं च "अथ किमर्थम्" इत्यादिपूर्वपक्षसिद्धान्तावेकदेशिनोरिति बोध्यम्। किं चार्थनिर्देशे जनपदे यः प्रत्यय इत्यन्वयेऽनियमप्रसङ्गाभावान्नियमफलाय परिभाषा नोपतिष्ठते इत्यपि बोध्यम्॥ भाष्ये

आनन्तर्य्यमात्रे इति। (भा)

न तु व्यवधाने इत्यर्थः॥

ननु संहितायामिति। (कै)

निमित्तस्थानिनोरन्येनाव्यवधानं संहितेति भावः॥

उपश्लिष्ट इति। (कै)

उपसमीपे श्लिष्टोऽत्यन्तसमीप इति हि तदर्थः॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ।) (अ. १ । पा. १ । आ. ९)
(तस्मादित्युत्तरस्य । १ । १ । ६७ ।)

नैष दोष इति । (कै)

वर्णशून्यकालाभावः संहितेति भावः ॥

सत् सप्तमीति । (कै)

औपश्लेषिकाधिकरणत्वस्य व्यवहिते बाधात् सत्ता तु व्यवहितेऽपीति भावः । एवं च निर्दिष्टग्रहणमौपश्लेषिकाधिकरणसप्तम्यां तात्पर्य्यग्राहकमिति तात्पर्य्यम् । वस्तुत औपश्लेषोऽत्यल्पव्यवहितेऽस्त्येव । किंचिद्दूरस्थितेऽपि वृक्षमूले तिष्ठतीति कटव्यवधानेऽपि भूमौ श्येत इति च व्यवहारात् ॥ ननुव्यवहिते इकोऽचः पूर्वत्वाभावेनाप्राप्तेर्निर्दिष्टग्रहणं व्यर्थमत आह

व्यवहितेऽपीति । (कै)

मथुरायाः पूर्वं पाटलिपुत्रमित्यादिव्यवहारादिति भावः ॥

यत्र विषय इति । (कै)

लक्ष्यभेदेन लक्षणभेद इति भावः । वस्तुतः संहिताधिकारो न कर्त्तव्य इत्यभिप्रायकमिदं भाष्यं संहिताधिकारप्रत्याख्यानं च तत् सूत्रे भाष्ये स्पष्टम् ॥ "किमुदाहरणम्" इत्यादिना सूत्रप्रयोजनस्योक्तत्वात् प्रश्नानुपपत्तिरत आह

किं नियमार्थमित्यादि ॥ (कै)

ननु पूर्वोत्तरयोर्योगयोरिति भाष्यदर्शनेन पूर्वोत्तरयोरित्यस्य योगसमानाधिकरणत्वात् सापेक्षस्यासमर्थत्वेन योगाविशेष इति समासो न स्यादत आह

(अ. १। पा. १। आ. ९) (तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

कर्मणि षष्ठीति । (कै)

क्रियायाः कारकांशे नित्यसापेक्षत्वेनाविरुद्धः समास इति भावः। पूर्वोत्तरयोर्योगयोरिति तु फलितार्थकथनम् ॥

अच्युपश्लिष्टस्येति । (कै)

औपश्लेषिकेऽधिकरणे सप्तमीति भावः। आद्यसूत्रोदाहरणं दध्युदेति द्वितीयसूत्रोदाहरणं पचत्योदेति ॥ तनु नियमपक्षात् षष्ठीप्रकृतिपक्षः प्रशस्तोऽनुवाददोषाभावादत आह

तच्च षष्ठीति ॥ (कै)

भाष्ये "योगयोः" इति द्विवचनोपपत्तये आह

कर्मणीति । (कै)

युज्यमानयोः पूर्वपरयोरविशेषात् सम्बन्धाविशेषादित्यर्थः। वस्तुतस्तु व्यधिकरणे षष्ठ्यौ प्रतियोगिद्वित्वेन सम्बन्धद्वित्वाच्च द्विवचननिर्देश इति बोध्यम् ॥

सत्सप्तमीपक्षेऽपीति । (कै)

"[१]यस्य च भावेन" इति सप्तमीति भावः॥ इदं चिन्त्यमित्याह

[२]उपपदविभक्तेरिति । (कै)

कारकविभक्तित्वं च कारकाधिकारपठितसंज्ञानिमित्तक-

---

१ अ २। पा ३। सू ३७ ॥

२ उपपदविभक्तेः कारकविभक्तिर्बलीयसी । परिभाषेन्दुशे—१०२ ॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ।) (अ. १ । पा. १ । आ. ६)
(तस्मादित्युत्तरस्य । १ । १ । ६७ ।)
विभक्तित्वम् । एतच्च[1] "तत्र च दीयते" इति सूत्रे कैयटे स्पष्टम् ॥

न तु [2]दिग्योगेति । (कै)

सप्तम्या अप्युपलक्षणमिदम् । एतच्च[2] "आन्नलोप" इत्यत्र निरूपयिष्यामः ॥ पर्य्यायस्यैवाऽऽदाने बीजमाह

न हि युगपदिति । (कै)

स्थानित्वेन कार्य्यित्वेन प्राधान्यं निवर्त्यत्वं च । निमित्तत्वे च पारार्थ्येन गुणत्वं सत्त्वं च तच्चोभयमेकदा एकस्य विरुद्धमिति भावः ॥ ननु "[3]सन्देहः" इति भाष्योक्त्या शास्त्रस्य मूकत्वमित्याशङ्क्यात्यत आह

[4]सन्देहस्त्विति ॥ (कै)

ननु कार्य्यकालत्वात् परिभाषयोः पौर्वापर्य्याभावात् कथं विप्रतिषेधोऽत आह

---

१ तत्र च दीयते कार्य्यं भववत् । ५ । १ । ६६ ॥

२ अ २ । पा ३ । सू २६ ॥ ३ अ ६ । पा ४ । सू २३ ॥

४ अचि पूर्वस्य अचि परस्येति सन्देहः । भा ॥

५ उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादधिकरणे सप्तमी कृता न तु दिग्योगलक्षणा पंचमी तेन दध्युदकम् इत्यादौ पर्य्यायप्रसङ्गः । न हि युगपदेकस्य स्थानित्वं निमित्तत्वं चोपपद्यत इति नियमार्थं वचनं पूर्वस्यैवाऽनन्तरस्यैव भवतीति स्वयं चानेन क्रियते परनिवृत्तिर्व्यवहितनिवृत्तिश्च सन्देहस्तूपक्रममात्रतयोपन्यस्तः । न हि सन्देहादलक्षणमिति न्यायात् पर्य्यायप्रसङ्गात् ॥

(अ. १। पा. १। आ. ६) (तस्मिन्निति निर्दिष्टे पूर्वस्य। १। १। ६६।)
(तस्मादित्युत्तरस्य। १। १। ६७।)

सूचपाठेति। (कै)

अत एवाग्रे "[1]ङमो ह्रस्वाद्" इति चैपादिकमुदाहरणं संगच्छते। तत्र हि कार्य्यकालपक्षाश्रयेणैव परिभाषाप्रवृत्तिरिति बोध्यम्॥

विभक्तिविशेषनिर्देशस्यानवकाशत्वादिति। (भा)

इदमुदाहरिष्यमाणोदाहरणविशेषापेक्षम्। अत एव "[2]ङः सि धुट्" इत्यत्र द्वयोरनवकाशत्वेऽपि न क्षतिः॥ भाष्ये

वक्ष्यति तास्यादिभ्य इति। (भा)

"[3]तास्यनुदात्तेत्" इति सूत्रे "[4]अभ्यस्तसिजर्थ इति" "[5]अभ्यस्तानामादिः" "[6]आदि सिच" इति सूत्रयोः "ङसार्वधातुक" इति सप्तम्यन्तानुवृत्तिसिद्धये इत्यर्थः॥ ननु भाष्ये "सर्वनामस्थानस्य" "[7]गोत" इति षष्ठीदर्शनात् "णिद्" इत्यनेनान्वयो न स्यादत आह

१। अ ८। पा ३। सू ३२॥ २ अ ८। पा ३। सू २९॥

३ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ङितश्च। ६। १। १८६॥

४ वक्ष्यति तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तसिजर्थ इति। भा॥

५ अ ६। पा १। सू १८९॥

६ आदिः सिचोऽन्यतरस्याम्। ६। १। १८७।

७ गोतो णित् (७। १। ९०) गोतः परस्य सर्वनामस्थानस्य सर्वनामस्थाने परतो णित इति सन्देहः। गोतः परस्य सर्वनामस्थानस्य॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य। १। १। ६६।) (अ. १। पा. १। आ. ६६)
(तस्मादित्युत्तरस्य। १। १। ६७।)

णित्त्वमिति। (कै)

भावप्रधानो निर्देश इति भावः॥ गोतो णित्त्वे को दोषस्तत्राह

[1]तिष्ठतीत्यादि॥ (कै)

पदस्य चैकेति। (कै)

व्यक्तिपक्षे इदम्। व्यक्तिपक्षेऽप्येवं विधप्रयोगसाधनायैवं व्याख्यानमिति भावः। यद्वाऽन्तशब्दस्यावयववाचित्वेनेदृशविषये जातिग्रहणासम्भव एवेत्याहुः॥ "[2]ङः सि धुट्" इत्यादौ उभयोरप्यनवकाशत्वादाह

पूर्वोपात्तेष्विति। (कै)

"[3]बहोरि"ति पञ्चमी अचरितार्थाऽत एवेष्टादिषु षष्ठी। अत एव "[4]भूच बहोः" इति पृगग्रहणं चरितार्थम्। "गोत" इत्यादौ सर्वनामस्थाने इति सप्तमी पूर्वत्र चरितार्था गोशब्दस्य णित्त्वे वैयर्थ्यं च। तिष्ठति गौरित्यत्र गोशब्दं प्रति तिष्ठतेरनङ्गत्वान्न दोषः। "[5]रुदादिभ्यः सार्वधातुक" इति "[6]लिङः स लोप" इत्यादौ चरितार्थम्। तत्र हि सार्वधातुके विद्यमानस्य सस्य

---

१ यदि गोशब्दस्य णित्त्वं स्यात्तदा तिष्ठति गौरित्यत्र वचनसामर्थ्यादनङ्गस्यापि वृद्धिः स्यात्॥

२ अ ८। पा ३। सू २६॥

३-४ बहोर्लोपो भू च बहोः। ६। ४। १५८॥

५ अ ७। पा २। सू ७६॥ ६ अ ७। पा २। सू ७६॥

लोप इत्यर्थः। "[1]आमि सर्वनाम्न" इत्यामीति "[2]जेस्तय" इत्यत्र सावकाशम्। "[3]ङम" इति सूत्रेऽचीति "[4]मय उञ" इति सूत्रे चरितार्थम्॥ भाष्ये "[5]पञ्चमीनिर्देशो भविष्यति" इत्यस्य बलवान् स्वार्थ एव भविष्यतीत्यर्थः। सप्तमी तु षष्ठ्यर्थे इति भावः॥ भाष्ये एकदेशी प्रौढ्याह

[6]यथार्थं वेति॥ (भा)

तत्रार्थशब्दो न प्रयोजनादिवाचीत्याह

यथाविषयमिति॥ (कै)

प्रदेशेष्विति। (कै)

प्रागुक्तेष्वित्यर्थः॥ भाष्ये

[7]पूर्वस्य षष्ठीति। (कै)

---

१ अ ७। पा १। सू ५२॥ २ अ ७। पा १। सू ५३॥

३ अ ८। पा ३। सू ३२। ४ अ ८। पा ३। सू ३३॥

५ विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेधः। वा। विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तोऽयं विप्रतिषेधः। सर्वत्रैवाच* कृतसामर्थ्या रुत्वम्यकृतसामर्थ्या पञ्चमीति कृत्वा पञ्चमीनिर्देशो भविष्यति। भा॥

६ यथार्थं वा षष्ठीनिर्देशः। वा। यथार्थं वा षष्ठीनिर्देशः कर्त्तव्यः॥

७ यत्र पूर्वस्य कार्य्यमिष्यते तत्र पूर्वस्य षष्ठी कर्त्तव्या। यत्र परस्य कार्य्यमिष्यते तत्र परस्य षष्ठी कर्त्तव्या॥

---

* कश्चिद् भाष्यपुस्तके "अच" इति नास्ति॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।) (अ. १। पा. १। आ. ६)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

पूर्वबोधकपदस्य षष्ठ्यन्तस्योच्चारणं कार्य्यमित्यर्थः। एवं चोभयोच्चारणे गौरवमित्येकदेश्युक्तिरियम् ॥ तत्र तत्र षष्ठ्यन्त-षष्ठ्यन्तयोर्द्वयोः पाठे गौरवं मत्वेतर एकदेशी आह

[१]स तर्हीति ॥ (भा)

एकदेशी प्रौढ्यैवाह

न कर्त्तव्यः ॥ (भा)

अनेनैवेति। (भा)

षष्ठीपदानुवृत्तिगौरवादयमेकदेशी। उभयोः प्रकल्पकत्व-वारणाय परत्वानवकाशत्वे चावश्यके इति च ॥

निर्दिष्टे पूर्वस्य षष्ठीति। (भा)

पूर्वस्य कार्य्यित्वप्रतिपादनयोग्या षष्ठी तद्बोधकपदे भवती-त्यर्थः। एवमुत्तरस्येति ॥

न हीति। (कै)

आवृत्तिप्रसङ्गादिति भावः ॥ इतर एकदेशी "उपदेश" इति "[२]हलन्त्यम्" इत्यत्रानुवर्त्तते इति मत्वाऽऽह

---

१ स तर्हि तथा निर्देशः कर्त्तव्यः। न कर्त्तव्यः। अनेनैव प्रकृतिर्भवि-ष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी। तस्मादित्युत्तरस्य षष्ठी। तत्तर्हि षष्ठीग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। प्रकृतमनुवर्त्तते। अप्रकृतम्। षष्ठीस्थाने योगा (१। १। ४९) इति ॥

२ अ १। पा ३। सू ३ ॥

(अ. १। पा. १। आ. ९) (तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

[1]इत् संज्ञेति ॥ (भा)

तद्व्याचष्टे

[2]उपदेशाभावादिति । (कै)

"[3]स्थानेऽन्तरतम" परिभाषयाऽनुमीयमानत्वेनादेशस्योच्चारणाभावादित्यर्थः॥ ननु स्थानिन्येव तस्याः प्रवृत्तेरनुमीयमानादेशो निरनुबन्धक एवेत्यत आह

[4]स्थानी चेति । (कै)

यदा धातोः प्रत्ययस्तदानीमेवादेशो भवेदिति नेत्संज्ञादिप्रतीयते। यच्च कार्यं तत्रेत्संज्ञेति प्रयोग एवेत्यभिमानः। एकादेशयुक्तित्वाच्च नात्यन्तं निर्भरः कार्य इति बोध्यम् ॥

---

१ अत्र भाष्यम्। "प्रकल्पकमिति चेन्नियमाभावः। वा। प्रकल्पकमिति चेन्नियमस्याभावः। उक्तं चैतन्नियमार्थोऽयमारम्भ इति। प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युः। तत्र को दोषः। गुणिञ्किद्भ्यः सन् (३। १। ५) गुणिञ्किद्भ्य इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्तस्मादित्युत्तरस्येति। अस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतः सनः सन्नेव भविष्यति। नैवं शक्यम्। *इत्संज्ञा न प्रकल्पेत उपदेश इतीत्संज्ञोच्यते ॥

२ आदेशस्योपदेशभावात्तस्येत्संज्ञा न सिध्यतीत्यर्थः॥

३ अ १। पा १। सू ५०॥

४ स्थानी चोत्पत्तिकाल एव निवृत्त्यभिमुखतया प्रतिपन्न इति स्थानिन्यपीत्संज्ञा नास्ति ॥

---

* "तत्र" इत्यधिकम् दक्षिणात्यीयभाष्यपुस्तके ॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १। १। ६६ ।) (अ. १। पा. १। आ. ६)
(तस्मादित्युत्तरस्य । १। १। ६७ ।)

ततश्चेति । (कै)

पूर्वस्य जायमानो यणपि पूर्व एवेति तत्रापि षष्ठीकल्पनमिति भावः ॥

विरोधाभावादिति । (कै)

स्थानिभेदादित्यर्थः । अत एव विप्रतिषेधाप्रवृत्तिः । यद्यपि कार्य्यित्वनिमित्तत्वे युगपद्विरुद्धे तथाप्येकदेशयुक्तित्वान्नात्यन्तं निर्भरः कार्य इति बोध्यम् । एवमग्रेऽपि बोध्यम् ॥

यत्र त्वस्तीति । (कै)

"तस्मिन्निति" इत्यस्य बहुविषयत्वलाभाय विषयभेदेन भेदात् क्वचित् पूर्वस्य षष्ठीति विधिपरं क्वचिन्नियमार्थमित्यर्थः ॥

सूत्र एवेति । (कै)

षष्ठीप्रकृतेः प्रागेव परत्वादन्तरङ्गत्वाच्चोपदेशोत्तरकाले सूत्र एवेत्संज्ञा कार्य्यन्तु प्रयोग एवेति भावः । एवं च निरनुबन्धस्यैव प्रत्ययेन विधानात्तदादेशस्य कुतस्सानुबन्धकतेतितात्पर्य्यम् ॥ भाष्ये

उपदेश इति हीत्संज्ञोच्यते इति । (भा)

एवं च तदुक्तिर्व्यर्थेतिभावः ॥ "हलन्त्य" सूत्रे उपदेशपदाऽसम्बन्ध एवेति तत्सूत्रे वक्ष्यमाणपक्षेऽप्याह

अथ वेति ॥ (भा)

परत्वविशिष्टस्येति । (कै)

अनुत्पत्तौ धातोः परस्य इति वक्तुमशक्यत्वादितिभावः ॥

उपक्षय्यादिति । (कै)

पञ्चम्या इति शेषः ॥

प्रवृत्त्यन्तराभावादिति । (कै)

पुनः प्रवृत्तौ मानाभावादितिभावः ॥

अपेक्षाया इति । (कै)

श्रुतयोः सम्बन्धाभावे हि तस्मिन्नित्यनेन षष्ठीप्रकृत्यपेक्षा न च प्रकृते तथा लिङ्गाच्छ्रुतेर्बलीयस्त्वादित्यर्थः ॥ भाष्ये

अथवाऽस्तु तावदिति । (भा)

प्रथमाषष्ठीनिर्देशसामर्थ्यात् प्रथमत इण्यणोः स्थान्यादेशभावोऽस्तु तत एतत्सूचबलाद्यणः स्थानित्वेऽपि न क्षतिरित्यर्थः ॥ भाष्ये

यच्च नाम सौची षष्ठी यदिचेदानीमिति । (भा)

यच्च सौची षष्ठ्यस्ति तत्रापीदानीं यदि प्रकल्पयेत्तर्हि अस्तु प्रकल्पयतित्यर्थः । परं विदं प्रौढ्या [१]"अथवा नानुत्पन्ने सनि" इति प्रागुक्तन्यायाद् [२]"गाङ्कुटादिभ्य" इत्यादौ षष्ठीप्रकृतावपि न दोषः । ङित्त्वदस्य धर्मपरत्वादिति बोध्यम् ॥ यद्यपियुगपत्प्रकृत्तिर्विरोधान्न सम्भवति तथाप्येकदेशित्वादेव ज्ञापकेन परिहरति

---

४ अथवा नानुत्पन्ने सनि प्रकृत्या भवितव्यं यदाचोत्पन्नः सन् तदाक्षतसामार्थ्यात् पञ्चमीतिकृत्वा प्रकृत्तिर्न भविष्यति । भा ॥

५ अ १ । पा २ । सू १ ॥

(तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ।) (अ. १ । पा. १ । आ. ६)
(तस्मादित्युत्तरस्य । १ । १ । ६७)

[1]नोभे (भा)

इत्यादिना ॥

तथैव प्रकृतिरिति । (कै)

अवर्णादचि अवर्णस्याचश्चैको गुणो भवतीत्यर्थः इतिभावः ॥ ननूभयोः प्रकल्पकत्वाभावेऽपि कस्य प्रकल्पकत्वमत आह

तच्च परत्वेति । (कै)

[2]"ङः सि धुट्" इत्यादौ परत्वमुक्तेष्वनवकाशत्वमिति भावः । ननु [3]"दीर्घाद्" इति सूत्रे पञ्चम्या अनवकाशत्वेन परत्वेन च षष्ठीप्रकल्पनं स्यादत आह

दीर्घाच्छे इति । (कै)

[4]"सुराच्छाये"ति पदान्ते तुको वैकल्पिकत्वाच्चिन्त्यमिदम् । तुक्सहितं पाणिनिपाठमभिप्रेत्य तु ज्ञापकोपन्यासः । युक्तश्च तथापाठः । वैकल्पिकेषु भावानुष्ठानस्य धर्माधिक्यफलकत्वात् ॥

---

१ यदप्युच्यते सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रकृतिस्तत्रोभयकार्य्यप्रसङ्ग इति । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति नोभे युगपत्प्रकल्पिके भवत इति । यदयमेकः पूर्वपरयोः (६ । १ । ८४) इति पूर्वपरग्रहणं करोति । भा ॥

२ अ ८ । पा ३ । सू २९ ॥ ३ अ ६ । पा १ । सू ७५ ॥

४ विभाषा सेनासुराच्छायाशालानिशानाम् । २ । ४ । २५ ॥

स्वंरूपं शब्दस्याशब्दसंज्ञा । १ । १ । ६८ ॥

[1]स्वरूपस्येति । (कै)

शब्देनार्थप्रतीतावर्थे केषां चित्कार्य्याणामसम्भवात्तद्वाचकशब्द-मात्रग्रहणादितिभावः ॥

[2]अन्येत्विति । (कै)

शब्दस्य रूपमिह ग्राह्यत्वेन विधित्सितमिति नेह प्रदेशविशेषा-समर्पकं लिङ्गमस्तीतिभावः ॥ ननु शब्दस्य दृत्येव लिङ्गं यच्च शब्द-ग्रहणं तच्च स्वरूपमेव ग्राह्यं न तु पर्य्यायादीत्यर्थः । तेन जनपदे अपत्यम् दृत्यादौ नास्याप्रवृत्तिरत आह

विध्यन्तरेति । (कै)

न हि स्वंरूपम् दृत्यस्य [3]"अग्नेर्ढग्" दृत्यादौ पञ्चम्यन्तेन सामानाधिकरण्येन वैयधिकरण्येन वा सम्बन्धः सम्भवतीति भावः ॥ भाष्यकारोऽप्याह

---

१ स्वरूपस्य पर्य्यायाणां तद्विशेषाणां च ग्रहणे प्राप्ते नियमार्था परि-भाषेयमिति केचिदाहुः ॥

२ अन्ये तु लिङ्गाभावाद्विध्यन्तरशेषभावाभावाच्च नेयं परिभाषा अपि तु संज्ञासूत्रमिदमिति प्रतिपन्नाः । देवदत्तादयस्तु संज्ञाशब्दा नियमार्था इति सिद्धान्तः ॥

३ अ ४ । पा २ । सू ३२ ॥

रूपं शब्दस्य संज्ञा इति (भा)

दित्यमेव पक्षो युक्तः॥ ननु संज्ञापक्षे उभयगतिन्यायादेकस्यानेकार्थसम्भवाच्चार्थस्य प्रतीतौ तत्र कार्य्यासम्भवे ढगादयः पर्य्यायादिभ्योऽपि दुर्वारा इत्यत आह

देवदत्तादयश्चेति ॥ (कै)

नियमार्थत्वमुपपादयति

[1]सर्वार्थेति । (कै)

एकस्य सकलशब्दार्थात्मकस्फोटस्यैव सर्वबोधकत्वादितिभावः॥

शक्तियुक्त इति । (कै)

शक्त्याश्रय इत्यर्थः॥

सर्वशब्दप्रत्याय्यशक्तिरिति । (कै)

प्रत्याय्यत्वशक्तियुक्त इत्यर्थः॥ अनेन नियमद्वयं दर्शितम्। अनेन शब्देनायमेवार्थो ग्राह्यः। अयमर्थोऽनेनैव शब्देन बोधनीय इतिचेति। वस्तुतस्तु सर्वेषां सर्वार्थवाचकत्वेऽपि तत्रास्मदादिज्ञानविषयः। सर्वार्थसर्वशब्दानामस्माकं विशिष्याज्ञानात् किन्तु योगिनामेव तज्ज्ञानम्। एवं च शास्त्राधिकारिणोऽस्मदादीन्प्रति नियमार्थत्वं शास्त्रस्यासम्भव्येव। इयं कथा तु सर्वस्य ब्रह्मरूपत्वकथावन्न व्यवहारोपयोगिनी। तस्मात्प्रकरणादस्यैवार्थस्य शास्त्रे उपस्थितौ अर्थान्नियमः फलित इति बोध्यम्। तत्र द्वितीयो नियमश्चिन्त्यः।

---

१ सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः सर्वशब्दप्रत्याय्यशक्तियुक्त एवार्थ इति व्यवहाराय नियमः क्रियते। कै॥

(अ. १। पा. १। आ. ६) (स्वंरूपं शब्दस्याशब्दसंज्ञा। १। १। ६८।)

आकारादीनां वृद्धिशब्दातिरिक्तैराकारादिशब्दैर्व्यवहारानापत्तेरिति केचित्॥ ननु रूपरूपिणोरत्र भेदाभावाच्छब्दस्येति षष्ठ्यनुपपन्ना संज्ञासंज्ञिसम्बन्धस्यानुपपन्न इत्यत आह

रूपेति॥ (कै)

सामान्यलक्षणघटकानेकसमवेतत्वसिद्धये आह

शुकेति। (कै)

न च तत्रोच्चारणक्रियैव भिद्यते न शब्द इति वाच्यम्। तालवादिव्यापाररूपोच्चारणस्याश्रौतत्वेन शब्दश्रवणानन्तरं जायमानवक्तृविशेषानुमानानापत्तेः। उदात्तादिविरुद्धधर्माध्यासाच्च भेदसिद्धेः। वर्णनिष्ठतया प्रतीयमानानां ध्वनिनिष्ठत्वकल्पने मानाभावादिति भावः॥ ननु प्रायेणसामानाधिकरण्यं संज्ञासंज्ञिनोर्दृष्टं नचेह तदित्यत आह

तत्रेति॥ (कै)

स्वशब्दो व्यक्तिबोधको आत्मीयत्वेन। एवं च शब्दस्य तत्तद्व्यक्तिविशिष्टस्य स्वव्यक्तिस्वरूपसामान्यसंज्ञकमित्याद्यः पक्षः। शब्दस्य [१]स्वंरूपमित्युद्दिश्य स्वमित्यनेन व्यक्तिसंज्ञकत्वं विधीयते इति द्वितीयपक्षसम्भवः सामानाधिकरण्यस्योपपत्तिः। [२]नचानयोः फले कश्चिद्विशेष इत्याह

व्यक्तिरिति॥

---

१ शब्दस्य रूपम् - । क । ग । ङ ॥

२ नचानयोः पक्षयोः - । क । ग । ङ ॥

व्यक्तिद्वारेणेति । (कै)

सामान्यस्य [1]ढगादिभिस्साक्षात्यौर्वापर्य्यासम्भवादिति भावः ॥

रूपग्रहणं किमर्थम् (भा)

इति भाष्यस्य स्वशब्देनैव जातिर्ग्राह्या व्यक्तिर्वा शब्दस्य स्वं स्वीया जातिर्व्यक्तिर्वा बोध्येत्यर्थो भविष्यति । सामानाधिकरण्यमेव संज्ञासंज्ञिनोरिति तु न नियमः । "[2]उञ" इत्यादौ व्यभिचारादित्याशयः । शब्दस्य सूचोच्चारितस्य स्वं स्वीयं रूपं प्रयोगस्थं संज्ञीत्यर्थ इति केचित् ॥ भाष्ये

रूपं शब्दस्य संज्ञेति । (भा)

अत्र संज्ञाशब्दो बोध्यपरः । कर्मव्युत्पत्तेः । अन्यथा स्वशब्देनार्थबोधनाय रूपग्रहणमित्युत्तरभाष्यासङ्गतेः । नह्यर्थः शब्दस्य संज्ञा किन्तु बोध्य एवेति बोध्यम् ॥ तच्चात्मीयवाचिना स्वशब्देन रूपस्यैव कथं परिग्रहः इत्यत आह

प्रतीताविति ॥ (कै)

"उपदेशः" समन्यग्रहणम् ॥ "अन्तरङ्गत्वं" प्रथमतः श्रोत्रेणोपस्थित्या ॥ "अर्हत्वमु"पपादयति

अनुकरणेति । (कै)

शब्दमात्रतात्पर्य्यकोच्चारणस्यैवानुकरणत्वात् ॥ अर्थस्य रूपतुल्यत्वमभ्युपेत्याप्याह

---

१ ढगादिभिः । क । ङ ॥ २ अ १ । पा १ । सू ७ ॥

नचार्थ इति । (कै)

शब्दात्मिकानामेवावर्त्तिनीत्वेन संज्ञात्वात् तादृशसंज्ञाव्यवहाराच्चेति भावः ॥ ननु [1]स्वशब्दस्याभिधेयमित्येवार्थोऽस्त्वित्यत आह

संज्ञित्वे चेति । (कै)

लोकत एव सिद्धेरिति भावः ॥

ज्ञापकमिति । (कै)

स्वशब्देन बहिरङ्गस्याप्यर्थस्य ग्रहणे इत्यर्थः ॥ नन्वन्यस्य स्वीयस्य [2]सत्त्वेन तद्व्यावृत्त्यर्थं रूपग्रहणमित्यर्थो भाष्याल्लभ्यते एवं च शास्त्रेऽर्थस्याग्रहणे कथमर्थवत्परिभाषासिद्धिरिति चेन्न । अनन्यस्वीयमस्ति यतोऽनन्यस्यापि शब्दबोध्यत्वबोधनार्थमुभयोपादानमिति भाष्याशयात् । एवं चाधिक्यसंग्रहार्थं रूपग्रहणं रूपग्रहणेन चान्तरङ्गत्वादिन्यायतोधपूर्वकं स्वशब्देनार्थस्य शब्दबोध्यत्वं बोध्यत इति तात्पर्यम् ॥ तत्रोभयानुग्रहाय सति सम्भवेऽर्थवतो रूपस्य ग्रहणमसति केवलार्थस्य शुद्धस्य वा रूपस्य ग्रहणं तदाह

यत्र चार्थवतेत्यादि । (कै)

अर्थोपस्थापकेन रूपेणेत्यर्थः । अत एव भिन्नविभक्तिनिर्देशश्चरितार्थः ॥

[3]इह योग्यतेति । (कै)

---

१ स्वं । ग । इ ॥ २ सत्त्वे तद्व्यावृत्त्यर्थम् । क । ग । इ ॥

३ "इह योग्येति" इति वालेशटाइनमुद्रापितविवरणपुस्तकेऽस्ति तत्तु न सम्यक् ॥

योग्यता बोधजनकतारूपा तया लक्ष्यते कल्प्यते इति योग्यतालक्षणः शक्तिः । तस्या उभयाश्रयकत्वेन उभयाधीनत्व-लक्षणगुणयोगात् गौण्या वृत्त्या वा सम्बन्धपदव्यवहार्य्यत्वमिति बोध्यम् ॥

इत्यर्थ एवेति । (कै)

अर्थे कार्य्यस्य सम्भवादिति भावः ॥ ननु संज्ञाविधायकस्य तत्प्रतिषेधार्थकत्वमयुक्तमत आह

संप्रत्यय इति । (कै)

भावेऽङिति भावः ॥ नन्वर्थप्रत्ययस्य शब्दपूर्वकत्वेऽपि कथं स्वरूपस्यैव ग्रहणमत आह

शब्द इति (कै)

तथाच प्रथमप्रतीतत्वरूपकारणादुच्चारितशब्दस्यैव ग्रहणं युक्त-मिति भावः ॥

शब्दपूर्वक (भा)

इत्यस्य शब्दज्ञानपूर्वक इत्यर्थः ॥

प्रत्यासत्त्येति । (कै)

अर्थबोधानुकूलत्वेन ज्ञाते प्रथमप्रतीते शब्द एवार्थेऽसम्भवे कार्य्यं न तु तत्पर्य्यायादिस्थिति भावः । अर्थे कार्य्यासम्भवे तु तस्यैव । एवं चोपस्थितस्यार्थस्य सर्वथा त्यागे मानाभावादर्थवत्-परिभाषाऽपि सूत्रं विना सिद्धेति तात्पर्य्यम् । एवं चैतन्न्यायानु-वादकमिदं सूत्रं मन्दमत्यनुग्रहायेति बोध्यम् ॥ ननु अर्थज्ञानोत्तरं

(अ. १। पा. १। आ. ६) (स्वरूपं शब्दस्याशब्दसंज्ञा । १। १। ६८ ।)

परं प्रति तद्बोधनाय शब्दप्रयोग इति कथं शब्दपूर्वकत्वमर्थप्रतीतेरत आह

[1]अस्योपलब्धुरिति । (कै)

श्रोतुरित्यर्थः ॥ माध्ये

शब्दपूर्वको हीति । (भा)

हिः प्रसिद्ध्यर्थः । श्रोतुः शब्दज्ञानपूर्वकोऽर्थप्रत्यय इति लोके प्रसिद्धमित्यर्थः ॥ युक्तान्तरमयाह

आतश्चेति । (भा)

एवं च शब्दस्यार्थप्रतीतौ कारणत्वादर्थे कार्य्यासम्भवे तद्बोधकारणत्वेनोपस्थिते शब्दे कार्य्यमिति भावः ॥ इदानीं तत्तच्छब्दजन्यार्थबोधे प्रकारतया भासमानशब्द एव कार्य्यमर्थोऽसम्भव इत्याह

शब्दपूर्वकश्चेति । (भा)

शब्दविशेषणश्चार्थविशेष्यकः प्रत्यय इत्यर्थः । "[2]न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति भावः ॥ चकारेण चास्य युक्ततरत्वं सूचितम् ॥ भाष्ये

तस्मादर्थनिवृत्तिरिति । (भा)

अर्थवाचकशब्दान्तरनिवृत्तिरित्यर्थः ॥ फलान्तरं सङ्गते

इदं तर्हीति ॥ (भा)

एवमर्थमिति । (कै)

---

१ अर्थस्योपलब्धेरिति । ग । २ हरिः ॥

निषेधप्रतियोगिज्ञानार्थं न्यायसिद्धस्यापि विधेयांशस्यानुवाद इत्यर्थः ॥

किं प्रत्यय इति । (कै)

न चैवं "[1]षेषं वासवाहनधिषु च" इति धिग्रहणं व्यर्थं स्याद् न हि धाधातोः किं विनोदकस्य घ्युत्तरपदत्वं सम्भवति तच्च हि "[2]कर्मण्यधिकरणे च" इति तदुत्तरसूत्रेण किरिति वाच्यम् । उपलक्षणमिदं "[3]मनिमीमाघु" "[4]नेर्गद" इत्यादौ घुधातोर्ग्रहणं स्यादिति बोध्यम् ॥

कुमारी घ इति । (कै)

नन्वयं षष्ठीतत्पुरुषः कर्मधारयो वोभयथापि नाच प्राप्तिस्तच्च "स्त्रियां समानाधिकरण" इत्यनुवृत्तिरिति चेन्न । घोऽस्त्र्यर्थाः सा घा कुमारी घा अस्त्रेति बहुव्रीहौ कुमारी घ इत्यर्थाद् घादिषु ह्रस्वत्वं पुंवद्भावादिप्रतिषेधेनेत्युक्तेः पुंवत्वं बाधित्वा ह्रस्व-प्राप्तिरत्याग्रयात् ॥ घुसंज्ञाविधानस्य तर्हि कोऽवकाश इत्यत आह

[5]ई हलीति । (कै)

घसंज्ञापि "[6]किमेत्तिङव्ययघाद्" इत्यादौ चरितार्था तच्च हि तिङन्तात्पराऽन्यघान्तप्रातिपदिकाऽसम्भवादिति बोध्यम् ॥

---

१ अ ६ । पा ३ । सू ५८ ॥ ४ अ ३ । पा ३ । सू ६३ ॥
५ अ ७ । पा ४ । सू ५४ ॥ ६ अ ८ । पा ४ । सू २७ ॥
७ अ ६ । पा ४ । सू ११३ ॥ ८ अ ५ । पा ४ । सू ११ ॥

प्रदेशेष्विति। (कै)

सर्वप्रदेशेष्वित्यर्थः॥ संज्ञावचनसामर्थ्यगम्यप्रकरणात् प्रत्यासत्तिन्यायो बाधत इत्यभिप्रायः। न च "ई हल्यघोः" "किमेत्तिङव्ययघा" इत्यत्र तयोश्चारितार्थ्यम्। तावन्मात्रफलकत्वे तत्रैव दाधाग्रहणं तरप्तमप्ग्रहणं च कुर्य्यादिति बोध्यम्॥

उभयगतिरिति। (कै)

संज्ञावचनस्य प्रत्यासत्तेश्चानुग्रहायोभयगतिरिति भावः॥ सूचारम्भमभ्युपेत्येदम्।

[1]षड्भ्य इति। (कै)

भाष्ये संज्ञाप्रब्दो बोधकपरः। न हि षकारान्तो बोधकप्रब्दस्तत्रोच्चारित इत्यर्थ इति भावः॥

षकारान्तादिति। (कै)

जग्ग्रसोर्लुकः प्राग् जग्ल्वाभावात्। एवं च तदर्थं तस्य षट्संज्ञा विधीयत इति न ज्ञापकत्वमिति भावः॥

डकारान्त इति। (कै)

षष उत्तरयोर्जग्ग्रसोरिति स्वरूपग्रहणेन लुकि कार्य्ये जग्ल्वमसिद्धमिति भावः॥ तथापि संज्ञासूत्रे टान्तोच्चारणात् [2]"षड्भ्य" इत्यादौ डल्वासिद्धत्वेनैव निर्वाहः। संहिता पाठेन डान्तस्य संज्ञात्वे [3]"षट्चतुर्भ्य" इत्यत्र चर्त्वासिद्धत्वमावश्यकमिति तात्पर्य्यम्।

---

१ अ ७। पा १। सू २२॥ २ अ ७। पा १। सू २२॥
३ अ ७। पा १। सू ५५।

[1]"ष्णान्ते"त्यादि ज्ञापकं शास्त्रीयशब्दसंज्ञायाम् स्वरूपग्रहणमित्यर्थं बोधयतु न तु शब्दपदार्थके इत्याशयेनाह भाष्ये

मन्त्राद्यर्थमिति । (भा)

शब्दानुविद्धस्यैवेति । (कै)

"नमोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति हर्य्युक्तेरितिभावः। तद्बोधत्वेन महच्चरितत्वमित्यन्ये॥ चार्थाभावमुपपादयति

सामान्यशब्देनेति । (कै)

एवं च पदार्थभेदाभावात् साहित्यरूपचार्थासम्भव इति भावः॥

पर्य्युदासे इति । (कै)

कश्चित्तु [2]"अराजेति" च्छेदाभावात् किं च राजशब्दः शब्दपरः मनुष्यशब्दस्यार्थपरः इति दुर्लभं स्यात् किं च एवममनुष्यशब्देनापि मनुष्यपर्य्यायाणामेव ग्रहणं स्यादितीदं वाचनिकमेवेत्याह॥ आद्यन्तौ विहाय मध्योपादानेऽभिप्रायमाह

मृगेति । (कै)

एवं मत्स्याद्यर्थमित्यादिशब्दप्रयोजनं चिन्त्यम्॥

---

१ अ १। पा १। सू १४॥

२ सभा राजामनुष्यपूर्वा (२। ४। २३) इत्यत्र। अत्रैव भाष्ये॥ इनसभम् ईश्वरसभम्। तस्यैव न भवति। राजसभा। तद्विशेषाणां च न भवति। *पुष्यमित्रसभा॥

---

* वार्त्तिकोद्धृतसुद्रापितभाष्यमुस्तके "पुष्यमित्रसभा। चन्द्रगुप्तसभा" इति पाठोऽस्ति॥

अणुदित्सवर्णस्य चाप्रत्ययः। १। १। ६६॥

[1]किं यद्येति। (कै)

नाचेपोऽयं किन्तु विशेषजिज्ञासेत्यर्थः। उत यौगिक इत्यन्वयः। "किमर्थम्" इत्यत्रार्थशब्दोऽभिधेयपर इति तात्पर्य्यम्॥ नन्विदमः परत्वात् त्यदाद्यत्वेऽन्तरङ्गत्वाच्च पररूपे अर्धर्चतीयमात्रस्य सवर्णग्रहणेऽपि नान्तरतम आदेशः सम्भवतीति श्रुत एव भविष्यति। न च श्रुतापेक्षया दीर्घप्लुतयोरन्तरतमत्वात्ते एव भविष्यतः। ह्रस्वोच्चारणन्तु लाघवार्थं स्यादिति वाच्यम्। एवं तर्हि परत्वाद्धलिलोपे माचिकत्वान्माचिक एव भविष्यति तच्च नापीति वर्त्तते फलाभावादत आह

विशेषेति। (कै)

येननाप्राप्निन्यायादितिभावः। ग्रादीनां चोपदेशे एवेत्संज्ञालोपयोरणत्वेन सवर्णग्रहणप्रसक्तिः॥

[2]अनुनासिक इति। (कै)

पचे इति शेषः॥ नियमार्थं तत्स्यादत आह

---

१ "अप्रत्यय इति किमर्थम्" इति भाष्यमुपादाय "किं यस्य प्रत्ययसंज्ञाविहिता तस्य प्रतिषेध उत यं प्रतीयते विधीयते इति यौगिक प्रत्ययस्तस्यापीति प्रश्नः" इत्युक्तम्॥

२ बभूव इत्य॥

(अणुदित्सवर्णस्य चाप्रत्ययः। १। १। ६८।) (अ. १। पा. १। आ. ६)

ग्रहेरेवेति। (कै)

[1]"वृतो वा" इत्यनेन विरोधादितिभाव इति केचित्। वस्तुतस्तु यथा [2]"दिक्समासे" इति नियमादप्राप्तसमासविधायकं [3]"तद्धितार्थे"ति एवं ग्रहेरेवेति नियमादप्राप्तदीर्घविधयं "वृतो वा" इति स्यादिति चिन्त्यैषा व्याख्या। तस्माद् विधेयसङ्कोचस्यान्याय्यत्वात् तथा नियम इति भावः॥

ववरिथेति। (कै)

[4]"ववर्थ" इति च्छन्दसि दृङभावनिपातनाङ्गाषायां [5]"ह्रस्वभवृस्तु" इति दृट्प्रतिषेधो न। अलिट्येव "वृतो वा" इत्यर्थात् लिटि ह्रस्व एवेतिभावः॥

वाग्रहणमिति। (कै)

अत एव भाष्ये [6]"यद् विभाषां ग्राहि" इत्युक्तम्॥ भाष्ये

[7]भाव्यमानेति। (भा)

---

१ अ ७। पा २। सू ३८॥ २ अ २। पा १। सू ५०॥
३ अ २। पा १। सू ५१॥
४ बभूथाततन्थजगृम्भववर्थेति निगमे। ७। २। ६४॥
५ अ ७। पा २। सू १३॥
६ यत्तर्हि वृतो वा (७। २। ३८) इति विभाषां ग्राहि॥
७ भाव्यमानेन सवर्णानां ग्रहणं न इत्येवं न भविष्यति। प्रत्यये भूयान् परिहारः। अनभिधानात् प्रत्ययः सवर्णान्न ग्रहीष्यति। यान् हि प्रत्ययः सवर्णान् ग्रहीयाद् न तैरर्थस्याभिधानं स्यात्। अनभिधानान्न भविष्यति इदं तर्हि प्रयोजनम्। इह केचित् प्रतीयन्ते केचित् प्रत्याय्यन्ते। ह्रस्वाः प्रतीयन्ते। दीर्घाः प्रत्याय्यन्ते॥

(अ. १। पा. १। आ. ६) (अणुदित्सवर्णस्य चाप्रत्ययः। १। १। ६६।)

इयं च जातिग्रहणप्राप्तं गुणभेदप्राप्तं चानण् साधारणेन प्राप्तं सवर्णग्रहणं वारयितुमावश्यकीतिभावः॥

साधारणश्चेति। (कै)

"भूयान्" इत्युक्तिर्नापूर्वाऽनेकसमाधानाभिप्राया किन्तु सूत्रोक्ताप्रत्ययग्रहणमपेक्ष्येति "भूयान्" इति प्रतिज्ञायैकपरिहारोपन्यासेऽपि न विरोध इति भावः॥ ननु [1]"अस्य च्वौ" इत्यादाविवाऽर्थाभिधानासमर्थस्यापि सवर्णस्य ग्रहणं स्यादत आह

[2]प्रत्यय इतीति। (कै)

प्रत्ययविधौ सवर्णग्रहणे हि तेषामपि प्रत्ययत्वमेष्टव्यम्। तच्चाऽन्वर्थत्वादसम्भवीति न तत्र सवर्णग्रहणमिति भावः॥

[3]उच्चार्य्यन्त इति। (कै)

उच्चारणं चात्र साक्षाच्छब्देन बोधनं विवक्षितम्। अतोऽणादिशब्दप्रतीयमानेकारादिभिः सवर्णानां ग्रहणं सिद्धम्॥

ह्रस्वैर्ग्रहीतैरिति। (कै)

प्रकृतसूत्रस्थाणपदेनेति शेषः॥ ननु प्रत्याहारसूत्रोपदिष्टा एवाण इति कथमाकारो ग्राहक इत्यत आह

यथैवेति। (कै)

न चाऽऽच्चरसामान्नायिकविषयकः प्रतिषेधः प्रत्याय्यमान-

---

१ अ ७। पा ४। सू ३२॥

२ प्रत्यय इत्यन्वर्था संज्ञाकृता येनार्थं प्रतियन्ति स प्रत्ययः॥

३ प्रतीयन्ते श्रूयन्ते उच्चार्य्यन्ते अनादिचोदनास्वित्यर्थः॥

विषयं तु सवर्णग्रहणमिति वैपरीत्यं किन्न स्यादिति वाच्यम् । तथासत्यको विधीयमानस्य पूर्वसवर्णदीर्घस्य कुमार्यावित्यादावप्राप्ते "[1]दीर्घाज्जसि च" इति प्रतिषेधोऽनर्थकः स्यादिति भावः । एवं च वर्णसमाम्नायपठितानामेव ग्राहकत्वबोधनार्थमप्रत्ययपदमिति तात्पर्य्यम् ॥

उभयार्थम् । (कै)

ह्रस्वदीर्घोभयविध्यर्थम् । एवं च यत्नाधिक्यमेवासिद्धमिति भावः ॥

न्याय्य एवेति । (कै)

अनण्त्वादित्ययमित्यर्थः ॥ यदुक्तं तथैवेति तत्राह

[2]अच हीति ॥ (कै)

"स्वात्मनि क्रिया" स्वस्मिन् प्रवृत्तिः ॥ विरोधे हेतुमाह

अनिष्पादादिति । (कै)

अर्थाबोधादित्यर्थः ॥ नन्वल्पविषयेणाप्रत्यय इत्यनेन कथं बह्वविषयपरिभाषार्थः श्रूयते प्रतिपादयितुमत आह

[3]प्रतीयत इति ॥ (कै)

---

१ अ ६ । पा १ । सू १०५ ॥

२ अच हि सूत्रे प्रत्याहारसन्निविष्टा एव गृह्यन्ते स्वात्मनि क्रियाविरोधादनिष्पादाद्ग्रहणकशास्त्रान्तराभावाच्च अच सूत्रे अकारादिभिराकारादीनां ग्रहणासम्भवोऽन्येषु प्रदेशेषु अनेन सूत्रेणाकारादिभिराकारादयो गृह्यमाणा अणादिकार्य्याणि लभन्ते ॥

३ प्रतीयते विधीयते इति यौगिकस्याच प्रत्ययस्य ग्रहणमिति भावः ॥

भाष्ये "[1]ज्ञापयति" इत्यस्य योगेन बोधयतीत्यर्थः ॥ "अप्रत्ययः" इति च वाक्यभेदेन निषेधार्थमण् इत्यस्य च नाच सम्बन्धः । तेनोक्तसकलार्थलाभ इति भावः । वस्तुत एकदेशानुमतिद्वारा तां परिभाषां ज्ञापयतीति भाष्याचरार्थः । "विधीयते" इत्यर्थे "प्रतीयत" इत्यस्य प्रयोगदृष्ट्या कैयटोक्तं चिन्त्यम् ॥

आकृतीति । (कै)

प्रत्याहारसूत्रेषु "[2]अस्य च्वौ" इत्यादिषु चेत्यर्थः ॥ नेयमुदिद्विषया शङ्का चुलादिजातौ मानाभावेन तस्याऽऽवश्यकत्वादित्याशयेनाऽऽह

उदिदिति ॥ (कै)

कालादिभिन्नस्येति । (कै)

एकोऽवर्णे उदात्तत्वादिकं ध्वनिगतमिति पचेऽपि उपाधिभेदभिन्नत्वाद्ग्रहणं न सिध्यतीति भावः । अनन्ताऽवर्णव्यक्तय इति पचे तु अग्रहणं स्पष्टमेवेति बोध्यम् ॥ नन्वेतत्प्रयोजनम् "[3]अस्य च्वौ" इत्यादौ वा अगादिप्रत्याहारेषु वा । तत्राद्यं तत्राऽनुवृत्तिनिर्देश इत्यादिना दूषयिष्यति नान्य इत्याह

प्रत्याहारग्रहण इत्यादि ॥ (भा)

"[4]प्रत्याहारग्रहणे सवर्णाग्रहणमि"ति वार्त्तिकस्य द्वेधार्थः ।

---

१ तज्ज्ञापयत्याचार्य्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति ॥

२-३ अ ७ । पा ४ । सू ३२ ॥

४ तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात् । का ॥

"[1]अक" इत्यादावीकारादीनामगादिसंज्ञाभिर्ग्रहणं न प्राप्नोत्यनुपदेशादच्चरसमाम्नाये तेषामनुच्चारणादित्यर्थस्तदाह

यच्च संज्ञयेति। (कै)

एकस्यैव युगपत्प्रत्याय्यप्रत्यायकत्वयोर्विरोधादित्यर्थः॥

यच्च स्वरूपेणेति। (कै)

इदं चिन्त्यम्। व्यक्त्यानन्त्यैतस्याण्त्वाभावात्। तस्माद्यः स्वरूपेणोच्चार्य्यते "अक" इत्यादावकारादिरिति वक्तुमुचितम्॥ "प्रत्याहारे" अ इ उण् इत्यादौ॥ भाष्ये

यथा जातीयकानामिति। (भा

वर्णसमाम्नायपठितानामित्यर्थः॥

संज्ञेति। (भा)

"[2]आदिरन्त्येन" इति कृतागादिसंज्ञेत्यर्थः॥ यद्वाऽगादावीकारादिभिर्ह्रस्वैर्दीर्घाणामग्रहणं कुतोऽनुपदेशाद् "अकोऽचि" इत्यादाविकारादीनामनुच्चारणादित्यर्थस्तदाह

अथवेति। (कै)

भाष्यस्वारस्यं त्वाद्यव्याख्यायामेव॥

उच्चार्य्यमाणैरेवेति। (कै)

पुस्तकदर्शनादौ व्यभिचारादित्यर्थः॥

सन्निहिता इति। (कै)

---

१ अ १। पा १। सू १०१॥ २ अ १। पा १। सू ७१॥

Nyayabindutīkā, (Text)	Rs.	0 10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0
Pariciṣṭa Parvan. (Text) Fasc. 1–5 @ /6/ each	1	14
Prākṛita-Paingalam, Fasc. 1–2 @ /6/ each	0	12
Prithivirāj Rāsa, (Text) Part II. Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV. 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I. Fasc. 1–9. Vol. II, Fasc. 1–10, Vol. III. Fasc. 1–2, Vol. IV, Fasc. 1. Vol. V, Fasc. 1–5, Part IV, Vol. II. Fasc. 1–12 @ /6/ each	14	10
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-3 @ /6/ each ...	1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	8
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6	2	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ. Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each	13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah. with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/	1	8
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, 1–5 @ 1/ each	5	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms. and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...	...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...	...	7	2
Ma'āṣir-i-'Alamgīrī, (Text), Fasc. 1–6 @ /6/ each ...	...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each		4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn. (Text) Fasc. 1–5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members			
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein PH.D., Jl. Extra No. 2 of 1899	4	0

	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

24-10-1900.

Books are supplied by V-P.P.

PK
531
A15
1899
v.1
pt.8

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

Pātañjalī
Mahabhasyapradīpodyotah